1059

नं० ३६

मेघदूत सटीक पत्र संख्या ३४

जनार्दनकृत मेघसन्देशदीपकम्

पत्र-34

सम्पूर्ण

14"X6"

१६-५५ मेघदूत

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

श्रीमते रामानुजाय नमः । पित्रोर्वन्ननतोनुपित्रोर्वयोरपत्यं वो गजाननः विलोलितकरालोकसमत्रास्पदगजाननः १ प्रणम्य चरणौ गौर्य्याः श्रीगं
गाधरनन्दतः जनार्दनः प्रतनुते मेघसंदेशप्रदीपकम् २ कालानिधिमुखे पूर्वैर्व्याख्या च गतिहेतुभूस्तां किल बहतिर्मव्यं यथा प्रदीपवत् ३ प्रकाश्य का
लिदासाख्ये मेघदूतघनोन्नतौ प्रतिरसवर्षिणी जनार्दनसरस्वती ४ मेघदूतमहाकाव्यघनार्थजलपूरपिनी कविपीतरसा भातिजनार्दन
सरस्वती ५ यथारंभे संबंधाभिधेयप्रयोजनाधिकारिणं मतिपूर्वकं वसर्वप्रहावत्प्रवृत्तिरितित्तच्चतुष्टयं स्फुटीक्रियते तत्र संबंधो वा
च्यवाचकभावलक्षणः अभिधेयं यक्षीकाव्यलोकोत्तरवर्णनातिप्रणः कविलक्षणं प्रयोजनं चपूः प्रथमं तितथा चोक्तं काव्यप्रकाशे काव्यं यश
सेर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनीर्वृतये कांतासम्मिततयोपदेशयुजे इत्यधिकारिणो बुत्पित्सवः तदितं प्रार्थितसर्वसाहित्या
दिप्रबोधविशुद्धिशुद्धिर्महाकविः श्रीकालिदासः पुरुषार्थयोर्त्री तद्वाराधर्मार्थकामापवर्गसाधनमहाकाव्यकर्तुमनाः प्रथमतः समीहितरू
पमनोरूप्यरूपं वस्तु प्रणीतवान् यक्षो मणौ यक्षकरणे इति कोषः कृतासानुसर्गसंघो महाकाव्यमच्यते तस्य लक्षणं श्राणोर्न माक्ति यावर
स्तु निर्देशो वापि तन्मुखमिति प्रायोक्तत्वात् कथमस्य महाकाव्यत्वं सर्गबंधाभावेपि महाकपि प्रणीतत्वादेव तत्र यथा यमयज्ञ्लोकः कश्चिदिति
स्वाधिकारप्रमत्तः कांताविरहगुरुणा वर्षभोग्येन भर्तुः शापायनालंगमितमहिमा कश्चिद्यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु
रामगिर्य्याश्रमेषु वसतिं चक्रे स्वाधिकारोतियोगत्वस्मात् प्रमत्तः कुगसाविरामपुमदार्थोनां विषयस्योपसंग्रथनमित्यपादाने पंचमी प्रमतोऽनवहि
तः प्रमोदोनवधानतेत्यमरः अतएव स्त्रिया वियोगेन गरिष्ठस्तेन वियोगस्याचार्योवते नर्दषदुस्सहस्यपूर्वमननुभवादित्यभिप्रायः वत्सरं भोक्तुमर्हे
स्ते नात्यन्तसंयोगे चेति द्वितीया समासः कुमतिचेतिणत्वम् यद्वा वर्षे भारतवर्षे भोग्य इति देवयोनेर्मर्त्यलोकवासस्य नरकलोकवासत्वात् लोको यं

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भारतं वर्षमित्यमरः स्वामिनः आक्रोशेनास्तंगमितो विनष्टो महिमा माहात्म्यं यस्य सः प्रमत्तमित्यव्ययं प्रसंगात्तस्य सूर्योद्देशात्स्वपक्षस्योदयोऽव्य
वस्थो भावीति भावः महिमेत्यनेन दिव्यप्राकृतभावः सूच्यते सतादृक्कश्चिद्यक्षः कश्चिदिति निर्देशः स्वामिद्रोहत्वात्तस्य एवं सीता यामज्जने
न पवित्राणि धर्माण्युदकानि यत्र येषु तथाविधं पुण्यं मनोज्ञमिति हितं तथा सुकृतधर्मयोः छायया घर्मात्ययेन उपलक्षिताः सुखसरसाः छा
यातरवो यत्र येषु छाया या पालने वा तद्द्वर्थे तरवः मुनिकुलायफलदानात् छायापूर्णा तिर्वा तद्द्वर्थे तरवः छायापूर्णा तरवः छायापंक्तिर्वा तत्कृता
स्तरवः तथा वा तद्द्वर्थे वा तरवः तथा चोक्तं मध्याह्ने संस्थिते यस्य यैर्वा छाया अधिष्ठिताः स्तंभितास्तद्वत् तिष्ठति ते छायातरवो मताः छायातरुःस

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येन भर्तुः यक्षश्चक्रे जनकत
नयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु १ ॥

दा पूर्णाः पुष्पैः किसलयैः फलैरिति तरुकेषु
वा छाया यस्यादानतया भावे प्रतिबिंबार्का योषितोः पालनात्को चयोः प्रीतिश्रो भार्यं क्लिष्टवसन्तेति विश्वः रामाश्रितो गिरिश्चित्रकूटः प्रत्रप्राकपा
र्थिवादित्वान्मध्यमपदलोपी समासः तस्याश्रमाः तत्र बहुवचनं विरहखेदादेकत्रानवस्थानं सूचयितुं वसतिमवस्थानं निकेतनं वा वसतिः स्याद ॥
वस्थाने यामिन्यां च निकेतने इति विश्वः चक्रे इति कर्त्रभिप्राये क्रियाफले इति आत्मनेपदं कर्तृकरणे कृता बहुलमन्यहणादयमर्जुप्रत्यादिवर २
त्यं च मीसमासः स्वाधिकारात्प्रमत्तः श्रेष्ठ इति केचित्तदसंगतं प्रवाचकत्वात् किं च तथा सति निर्हेतुकत्वं स्यात् तथा च काव्यप्रकाशे गृहीतं पेरा
णीः परिभावा मुयाश्चोचितमपि प्रभावा यस्याश्चलिमपि कश्चिन्न विषयाः परित्यक्तं तेन त्वमसि सुतप्रोकान्तं भयाद्विमोसे प्राकृत्वा महापिवतः स्व मे॰
ल्लिमवते इति प्रात्वे मोचनेपि प्राको हतुर्नौ पान्तरे निर्हेतुत्वं वा अस्मिन्काले मंदाक्रान्ता छंदः तथोक्तं च मंदाक्रान्ता जलधिषडगैर्म्भौ नतौ तद्गु

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे॰ टी॰
२

तस्मिन्नद्राविति अबलाविप्रयुक्तः कनकवलयभ्रंशरिक्तप्रकोष्ठः कामी स यक्षस्तस्मिन्नद्रौ कतिचिन्मासान्नीत्वा आषाढस्य प्रथमदिवसे आश्लि
ष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं ददर्श। स्त्रिया वियुक्तः। तत्राबलावियोगजनितदौर्बल्यात्स्वर्णकटकयोरधःपातः तेन शून्यो प्रकोष्ठो यस्य
स तथा। तत्र चित्रकूटे कतिचिन्मासानित्यत्र यद्यपि संख्या नोक्ता तथापि शेषान्मासान्गमय चतुर इति वक्ष्यमाणत्वादष्टौ ज्ञेयाः। ननु सर्वनाम्नां प्रधा ॥ ४ ॥
नेनाभिसंबंधो युक्तः इह तूपसर्जनीभूतेनाद्रिपदेन कृत इति नोचितं सत्यं सर्वनाम्नां क्वचित्परामर्शोपि मिष्यते इति सा मासान्नगतस्यापि यथा वामन
वृत्तौ अथ पूर्वस्यानुप्रासनमित्यभिधाराकेषां पूर्वाद्दानामिति पूर्वोपादानं तत्र तत्रापि न दोषः। नीत्वा गमयित्वा आषाढस्य प्रथमदिवसे पौर्णमास्यां

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः आषाढस्य प्रथमदिवसे
मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श २ ॥

सास्मिन्पौर्णमासीति संज्ञायामित्यनेनाषाढी पूर्णिमा यस्मिन्
मासे स आषाढः। तस्यैव संज्ञेति कृत्वा पौर्णमास्याः प्राधान्यं सिद्धं तथा च प्रधाने प्रथमविशिष्टस्य मरः यद्वा प्रथममिति मेघविशेषणं आद्ये व्याख्याने प्रथमं
प्रोक्तमिति कोषकारः। तस्मिन्मासे अदिवसे अस्य विष्णोर्दिवसे एकादश्यामित्यर्थः। अकारो वासुदेवः स्यादिति नानार्थः। केचित्तु आषाढस्येति आनंतर्ये ष
ष्ठी आषाढानंतरे प्रथमदिवसे श्रावणस्य प्रतिपदिति व्याख्यांति तदयुक्तं प्रत्यासन्ने नभसीति वक्ष्यमाणे न विरोधात्। आश्लिष्टानि सानूनि येन तं शिखरस्थं
वप्रस्तटः गृहस्य चित्रभ्यां रणस्तु नादिकः तटे वप्रं पिता वप्रः इत्यनेकार्थे। तस्य क्रीडायां परिणतो दंतप्रहार इति यावत् गजविशेषो वा तिर्यग्दंतप्रहारस्तु गजः परि
णतो मतः तद्वन्मनोहरं यथा नमद्राक्षीत्। अत्राश्लिष्टपदेन सौहार्दं गजसाम्येन तयोरिष्टसिद्धिरपि ध्वन्यते गजदर्शनादिष्टसिद्धिरिति प्राकृतज्ञाः तत्रोपमा
गजउपमानं मेघं प्रेक्षणीयत्वरूपः साधारणो धर्मः वप्रक्रीडापरिणतेनालिंगितसानो धनस्य अत्र चोपमावाचकस्यैव शब्दस्य समासगतलोपात् लुप्तात

[illegible]

२

तस्य स्थित्वेति केतकाधानहेतोस्तस्य पुरः कथमपि स्थित्वा अंतर्बाष्पो राजराजस्यानुचरश्चिरं दध्यौ युक्तोयमर्थः मेघालोके सुखिनोपि चेतः अन्यथा
वृत्तिर्भवति किं कंठाश्लेषप्रणयिनि जने दूरसंस्थे पुनः केतकीसुमाधानं प्रकटीभावः तत्कारणस्य कौतुकाधानहेतोरित्यपि पाठः न्यक्षे कौतुहलं
कौतुकं चेत्यमरः जलदस्य अग्रतः विरहाद्वैकल्येपरिभ्रमरणप्राक्केरभावात् महादुःखेन अवस्थितो यः अंतर्मध्ये बाष्पोऽश्रु ऊष्मा वा यस्य सः कु
बेरस्य सेवकोऽग्रस्थः कश्चिरकालं चिंताकुलीभूत् जलदावलोकनस्योद्दीपनविभावत्वादंतर्बाष्पतावाष्पो नेत्रजलोष्मणोरिति विश्वः तत्रार्थांतरो

तस्य स्थित्वा कथमपि पुरः केतकाधानहेतोरन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ मेघा
लोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः कंठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ३

पन्यासः जलदावलोकने सति आलोकोदर्शनोद्योतावित्यमरः अबलाभिर्विनोदस्यस्यापि मनोन्यःवृत्ति संभवति कंठाश्लेषः स्नेहोपस्यतथावि
धे जने दूरगते किं पुनः किं वक्तव्यमित्यर्थः ननु पुरोव्ययमिति संज्ञेति प्राग्धातोरिति पुरः पूर्वस्य स्थित्वेत्यस्मात् प्राक् प्रयोगो युक्तः यथा माघका
व्ये महान्महानीलशिलारुचः पुरो निषेदिवानिति क्रियापदाद्धातुरस्तात् तत्रैवं त्यमेतत् यद्वा धातोः पुरस्तादेव युज्यमानस्य गतिसंज्ञा नियमानान्यत्रे
ति साधुत्वं तथा चोक्तं क्रियायोग इत्यनुवृत्तेस्तस्य एव योगे गतिसंज्ञेति न चात्र क्रियायोगस्तस्मात्साधुत्वं अलकाया विशेषणं पुर इति मेघस्य समी
पे स्थित्वेति योजना कार्या अत्रार्थांतरोपन्यासः ३ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे॰टी॰ प्रत्यासन्न इति नभसि प्रत्यासन्ने सति दयिताजीवितालंबनार्थी स्वकुशलमयीं प्रवृत्तिं जीमूतेन हारयिष्यन् प्रीतः सः प्रत्यग्रैः कुटजकुसुमैः कल्पि
३ तार्घाय तस्मै प्रीतिप्रमुखवचनं स्वागतं व्याजहार नभसि श्राकाशे द्योनभः खं श्रावणो नभा इत्यमरः समीपस्थे मेघजाले आसन्ने सति आकाश
मप्यासन्नं भवति वर्षतः प्रत्यासन्न इति भावः यद्वा प्रत्यासन्ने मनसीति पाठः तत्र प्रकृतिस्थे मनसि सति स्वरूपाद्विप्रच्युतस्य पुनस्तत्प्राप्तिः
प्रत्यापत्तिः यद्वा नभसि श्रावणे दयिताया जीवितस्य आलंबनं प्रार्थयते सौ जीवरक्षणार्थीत्यर्थः आत्मा मेसे प्रधानं प्राचुर्ये विकारश्चाधार

प्रत्यासन्ने नभसि दयिताजीवितालंबनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् । सप्र
त्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ४ ४ ॥

स्वादिषु मयट् वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः मेघेन प्रापयिष्यन् लृटः सद्वेति प्राप्तप्रत्ययान्तः हृक्रोरन्यतरस्यामिति वा कर्त्री याप्रसन्नमनाः प्रहृः
नूतनैः प्रत्यग्रोभिनवो नव्य इत्यमरः कुटजो गिरिमल्लिकेति यादवः तत्कुसुमैः कृतार्घाय मूल्ये पूजाविधावर्घ इत्यमरः मेघाय क्रियया यं संयोजयती
ति वक्तव्यमिति संप्रदाने चतुर्थी प्रीतः प्रमुखं प्रधानं तत्र वचनं क्लीबे प्रधानं प्रमुखं इत्यमरः स्वागतं कुशलं प्रश्ने सपद्यपपाद्यते मित्रे कुशलेनागतं व
पा इति यत्प्रश्नवचनं तत्स्वागतमुदाहृतं पद्मा सुष्ठु आगतमिति वचो जगाद ४ ॥ ३

संतप्तानामिति । भोः पयोद संतप्तानां त्वं शरणमसि तत् धनपतिक्रोधविश्लेषितस्य मे प्रियायाः संदेशं हर वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या
यक्षेश्वराणां अलकानाम वसतिर्गन्तव्या पयोद इदानीमिति संवुद्धौ हे पयोद आतपक्लान्तानां त्वं रक्षसि शरणं गृहरक्षित्रोरित्यमरः पततघनतस्तनो हेता
वित्त्यमरः कुवेरस्य कोपेन वियोगिनो मम वाचिकं कान्तायाः समीपे निवेदयेति भावः क्व संदेशं मया नीत्वा गम्यते इत्याकांक्षायामाह वहिःषष्ठि
लोपो यपूर्वे इति विधानात् इह हि मेघे वाह्यः वाह्योद्याने स्थितस्य शिवस्य शिरसि या ज्योत्स्ना तया शुभ्रीकृतानि गृहाणि यस्याः चन्द्रिकया प्रक्षालितमणिज
लप्रवाह प्रक्षालिता निवाना मेति प्रसिद्ध वाचकमव्ययं नाम प्राकाश्यसंभाव्यक्रोधोपमकुत्सने इत्यमरः यक्षाश्च ते ईश्वराश्चेति तेषां धनाढ्यानां वस

संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः संदेशं मे हर धनपतिक्रोधविश्लेषितस्य । गन्तव्या
ते वसतिरलका नाम यक्षेश्वराणां वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ७ ॥ ॥

तिर्वेश्म यद्वा यक्षाणामीश्वरास्तेषां कुवेरात् पूर्वे अनेकैर्यक्षपतिभिरियं पालितेत्यभिप्रायेण वहुवचनं अलकाख्या पुरी ते इति कृत्यानां कर्तरि वे
ति षष्ठी त्वया गन्तुं योग्या ननु त्वयेति कथं नाख्यातृतीया या आदेशप्रमाणाभावात् मैवं षष्ठी चतुर्थी द्वितीयाप्येति विपर्ययनिर्देशात् अन्यस्याः प्रयोग
दर्शनात् यथा एवं दृष्ट्वा धनुःपाणिं मानुषं समुपस्थितं राक्षसं वलमुग्रस्य किं वो भूता इव स्थिताः किं वः इति यूयमर्थे वररुचिस्तु तृतीयायामणाहेरक
चिदिति व्याजहार कृतं इति कृत्ते षष्ठ्यामिति नविधानं इदं तद्वदत्रापि तृतीयायामादेशो युक्त इति अहेः कृत्यनत्र चश्चेति तव्यः स्यादुपाने निःसरणे
वनभेदप्रयोजनेरित्यमरः ७ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे० टी० त्वामारूढमिति उद्गृहीतालकांताः प्रत्ययादाश्वसंत्यः पथिकवनिताः पवनपदवीमारूढं त्वां प्रेक्षिष्यंते त्वयि सन्नद्धे योन्योप्यहमिव पराधीनवृत्तिर्जनो
५ न स्यात्स को विधुरां जायामुपेक्षेत न वियोगिनीनामलकप्रसाधनाभावेन क्रीडा शरीरसंस्कारसमाजोत्सवदर्शनं हास्यं परगृहे पानं त्यजेत्प्रोषितभर्तृ
केति याज्ञवल्क्यस्मृत्युक्तत्वात् अलकप्रसाधनाभावः लोचनाच्छादकत्वे सत्युच्चैर्नीताः केशांतायामिता अलकाश्चूर्णकुंतला इत्यमरः प्रि
यागमनविश्वासात्त्वस्याभवत्यः प्राप्तोनुगत्वात् मानमाभावः यद्वा श्वासयथा चूर्णं मुंचंत्य प्रयाणकाले मेघागमे अवपूर्वं समेष्याम इति स्त्रीणा

त्वामारूढं पवनपदवीमुद्गृहीतालकांताः प्रेक्षिष्यंते पथिकवनिताः प्रत्ययादाश्वसंत्यः कः
सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ८ ॥

मयैव शापपर्यंतं कृत्वा प्रस्थितास्तासां पंथानामनागमेतिः श्वासमोचनमिति भावः प्रत्ययाधीनशपथज्ञानविश्वासहेतुष्वित्यमरः पांथस्त्रियः आषाढमा
रूढं त्वां द्रक्ष्यंति मेघसमाच्छादितदिग्विभागे सतीयः कश्चिदपरोपि पक्षसर्वदैवपरतंत्रो न भवेत् स कोवियोगेन विह्वलां स्त्रियं त्यजेत् वियोगेन
विधुरो विह्वलेति त्रिकांडशेषः अन्योपि रसज्ञोपि त्वयि सन्नद्धे मारापन्नमुद्यते वियोगिनीं क उपेक्षेत नेत्यपि ध्वन्यते अर्थांतरन्यासः ८ ॥ ५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मंदं मंदमिति यथानुकूलः पवनः त्वां मंदं मंदं नुदति अयं ते वामः सगर्वश्चातकश्च सगर्वं नदति नूनं गर्भाधानक्षणपरिचयादाबद्धमालाः बलाका नयन
सुभगं भवंतं खे सेविष्यंते यात्रायां प्रोत्साहनाय यथा भवनिवदति भो मेघ यथेति साहचर्ये चकारो वाक्यसमुच्चये कार्यसाधको वातः त्वां प्रेनैः प्रनेरिति क्रिया
विशेषणं वीप्सायां द्विर्वचनं प्रेरयति अनुकूलं मंदवचनेन यात्रायां सेमो ध्वन्यते तथेत्यध्याहारः तेन प्रकारेणापं पुरोवर्त्तीन वा वाममार्गस्थः सुंदरो वा
वामं सव्ये प्रतीये च द्रविणे चापि सुंदरे इति विश्वः सोत्साहः सगर्वं पदमिति पाठे सगर्वः फलसूचक इति केप्रावः तन्नेदं वातचातकयोर्द्वयोरपि विशेषणं सगं

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगर्वः । गर्भाधान
क्षणपरिचयान्नूनमाबद्धमालाः सेविष्यंते नयनसुभगं खे भवंतं बलाकाः ॥ ९ ॥ ९ ॥

योर्वं पुर्वातश्चातकश्च चकारो भिन्नभिन्नसमुच्चये चित्ताह्लादकं यथा भवति तथा क्रियाविशेषणं नांकर्मत्वमपुंस्त्वं चेति वक्तव्ये णद इत्यव्यक्ते शब्दे स्वयं क
रोतीति वा मभागे चातकशब्दः हेमाचेति शाकुनविदः निश्चयेन गर्भस्य कुक्षिस्थं जंतोः कुक्षौ कुक्षिस्थजंतौ च गर्भ इति यादवः तस्योत्पत्तिः सेवोत्सवो
त्सवो मुहूर्त्तो वा उत्सवे च प्रकोष्ठे च मुहूर्त्ते नियमे तथा क्षणशब्द इत्यनेकार्थे तेन यः परिचरयः यस्मान्मेघालोकाद्बलाकानां गर्भोत्पत्तिरित्यौचित्या
गर्भाधानस्थितेति पाठे गर्भग्रहणेन स्थितौ यो परिचयः तस्माद्द्विरचिता पंक्तिर्याभिस्ताः बलाकाः सुंदरं त्वां बलाकाः परिचरिष्यंति बलाकाशब्देना
त्राधियो ध्वन्यंते सामेष्वाणां चदर्शनं यात्रायां फलमिति शाकुनाः ९ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मा॰ टी॰
६

तां चावश्यमिति अविहतगतिस्त्वं एकपत्नीं दिवसगणनातत्परां अव्यापन्नां भ्रातृजायामवश्यं द्रक्ष्यसि हि यस्मात् विप्रयोगे आशाबन्धः प्रणयि कुसु-
मसदृशं सद्यः पाति अङ्गनानां हृदयं प्रायेण रुणद्धि वियोगिनीनां विप्रसंभावनया संप्रत्ययकथं प्रवर्त्तनं इत्याशंक्य प्रवासस्य फलमाह पूर्वोक्तं त्वन्निमि-
त्तैरविघ्नगतिस्त्वं एकः पारिथ्येस्याः सा नित्यं सपत्न्यादिरहिता उद्दिष्टा पतिव्रतामित्यर्थः अत एव दिनानां संख्यानतत्परतां अविनष्टां तां भ्रातुः स्त्रियं अव-

तां चावश्यं दिवसगणनातत्परामेकपत्नीमव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् आ-
शाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि १० ॥

लोकयिष्यसि भ्रातृपदेन परोक्षपरस्त्रीदर्शने दोषाभावः सूचितः ननु विरहे कथं जीवनसंभव इत्यत आह हि यतः विरहे सति आशा प्राप्त्यर्थेलब्धिसंभावना
सा बध्यते अनेनेति आशाबन्धः प्रेमास्यास्तीति तत् अत एव पुष्पेण तुल्यं सुकुमारं अत एव क्षणेन पतनशीलं पतनात्तत्क्षणात् पालु रुणद्धि ततः प्रायशो-
ऽङ्गनाहृदयमिति यथा इत्थंभूतैः पक्षिभिः पघनद्रप्रमुखैः प्रयोगे परेणेस यः पतयालुः पुष्पं तां च कुसुमबन्धनं हन्तमिति यावत् इत्यतीतिच्छायार्थः १० ॥
६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कर्त्तुमिति यन्तु ते गर्जितं महीमुच्छिलीन्ध्रातपत्रां कर्त्तुं प्रभवति श्रवणसुभगं तच्छ्रुत्वा मानसोत्का कैलासाद्बिसकिसलयच्छेदपाथेयवंतः राजहंसाः न
भसि भवतः सहायाः संपत्स्यंते पतत्सु ध्वनिः पृथिवी उद्गतानि गोमयच्छत्रकाण्येव आतपत्राणि यस्यां तादृशी उच्छिलीन्ध्रा वृक्षविशेषं वा शिलीन्ध्रा वृक्ष
भेदे पिच्छत्रकेपि नपुंसकमिति केपूवः विधातुं समर्थो भवति श्रोत्रसुखदं च तं ध्वनिमाकर्ण्य मानसाय उत्कण्ठिताः उत्कण्ठित उन्मना इति उत्कः कोन्
प्यत इत्युत्सुका इत्यर्थः घनगर्जितं श्रुत्वा हंसा मानसं यान्तीत्यैतिह्यं गन्तव्यः कैलासाद्रिर्यावत् मृणालं बिसमित्यमरः बिभ्यते उत्सृज्यत इति बिभ्यते यो मृण

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रातपत्रां तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः आकै
लासाद्बिसकि[illegible]लयच्छेदपाथेयवंतः संपत्स्यंते नभसि भवतो राजहंसाः सहायाः ११

लांकुराणां खंडान्येव पाथेयमेषामस्तीति पाथेयवंतः संबलं स्मृतं एवंविधा राजहंसा आकाशे न वसाद्धे भूताः राजहंसास्तु ते चंचुचरणैर्लोहिताः सिता इत्यमरः
चेति वा काव्यर्थे समुच्चये न केवलं प्राकृताः संगिनोपि भविष्यंति बहुव्रीहिणा मतुवर्थे प्राप्ते सति पाथेयवंत इति स्फुटार्थं मतुप पाथेयपदेन च हंसानां पथि
संबलसद्भावेन मेघप्रस्थापयितरणौ रुद्वेगजननमावोध्यते पथि साधु पथ्यं पाथेयं पथ्यतिथीति ढञ् ११ ॥ ११ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे· टी·
७

आपृच्छस्वेति पुंसां वंद्यैः रघुपतिपदैः मेखलास्वंकितं प्रियसखममुं तुंगशैलमालिंग्यापृच्छस्व कालेकाले यस्य संयोगं सत्वा विरहजमुष्णं वाष्पं मुंचतो भ-
वतः स्नेहव्यक्तिर्भवति पुरुषाणां नमस्करणीयैः रामचंद्रचरणैः कृत्यानां कर्त्तरि वेति षष्ठी पदं ध्यवसितित्राणश्वानालाः क्ष्माधिपवरुष्ठितमः कटकमू-
मिषु चिन्हितां मेखलां खड्गबंधे स्यात्कांचीप्रोलमितंव योषितिविश्वः प्रियपश्चासोसखा चेति प्रियसखस्तं राजाहः सखिभ्यश्च समासांतः पुरोवर्त्तिनं अमुंच
तरं तमाशिरिं आश्लिष्य प्रच्छं कुरु पृष्ठ अत्रात्मनेपदमाङि नुप्रच्छो हृष्यसंख्यानमित्यनेन समपेसमये यस्यगिरेः स्पर्शमनुभूय चिरविश्लेषेण मद्यतः अत्र उ-
ष्णाणं त्यजतः स्नेहप्रेम्णः प्रकटीभावो भवति १२ मार्गमिति भोजलदत्तावत्तन्मार्गानुरूपं मार्गं कथयतः शृणु तदनु श्रोत्रपेयं मे संदेशं श्रोष्यसि तव

आपृच्छस्व प्रियसखममुं तुंगमालिंग्य शैलं वंद्यैः पुंसां रघुपतिपदैरंकितं मेखलासु । काले काले भवति भवतो यस्य संयो-
गमेत्य स्नेहव्यक्तिश्चिरविरहजं मुंचतो वाष्पमुष्णम् १२ मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुकूलं संदेशं मे तदनु ज- ॥
लद श्रोष्यसि श्रोत्रपेयं खिन्नः खिन्नः शिखरिषु पदं न्यस्य गंतासि यत्र क्षीणः क्षीणः परिलघुपयः स्रोतसां चोपभुज्य १३

प्रस्थानानुकूलं पंथानं बोधयतो मत्तः शृणु आख्यातोपयोग इत्यपादाने पंचमी अथो मार्गमित्येव पदं शृणोतेः कर्मपात्राणां प्रस्थानमिति यद्वा पृथग् मां
शृणु पश्चात् कथयतो मम संदेशं श्रोष्यसीति योजना तत्पश्चात् सादरः माकर्णय मानायां मम वाचिकमाकर्णयिष्यसि यस्मिन्मार्गे श्रांतः श्रांतः सन्निति वीप्सा
यां द्विर्वचनं गिरिषु चरणं निधाय तथा तोपरहितः सन् पथः प्रवाहाणां पानीयं पीत्वा स्रोतसां वुसरणं क्षतिरित्यमरः व्रजिष्यसि उक्तानश्च पानीयगुणाः ल-
घु पीनामलं स्वादु स्नातं प्रस्तावणं जलं इति तत्क्षणमत्ता ख्यातगुणा पाषवर्णं पथ्यं कफहृत् वन्हिदीपनमिति अन्यस्यापि क्षीणस्य मध्यः पानमुपभोगाय भवति

७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अद्रेरिति पवनः अद्रेः शृंगं किंस्वित् हरतः इत्युन्मुखीभिः मुग्धसिद्धांगनाभिः चकितचकितं दृष्टोत्साहः उदङ्मुखः पथि दिङ्नागानां स्थूलहस्तावलेपान् परिह
रन् सरसनिचुलाद् अस्मात् स्थानात् खम् उत्पत वातोः गिरेः शृंगं किमिति प्रश्ने स्विदिति वितर्के न पतति इति के हेतोः उच्चवदनाभिः मुग्धाश्च ताः सिद्धस्त्रिय
स्ताभिः भीतभीतं यथा स्यात्तथा दृष्ट उत्साहो यस्य सः उत्तरां दिशं प्रति सन्मुखः सन्मार्गे दिग्दन्तिनां महतां शुण्डानां स्थापीनां यवा प्रति भटराजादिष्विति

अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः स्थानाद
स्मात्सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् १५ ॥

स्थूलशुण्डादण्डाभिघातान् संत्यजन् त्वं सरसा निचुला हस्तविशेषा यत्रैतादृशादस्मात् स्थानाद्रामगिरेरूर्ध्वं गच्छ उन्मुखीभिः इति स्वांगान्डीषनिचुलो
हिंगुलो वुज इत्यमरः नदीतीरे गवां गोष्ठे क्षीरवृक्षे जलाशये आरामे च कूपादाविषवं पूर्दिनं विसर्ज्जयेति १५ ॥ १५ १५ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

हेमेघ पुरस्ताद्रत्नछायाव्यतिकर इव प्रेक्ष्यमेतदाखंडलस्य धनुःखंडं वल्मीकाग्रात्प्रभवति येन ते श्यामं वपुरतितरां स्फुरितरुचिना वर्हेण गोप
वेषस्य विष्णोरिव कांतिरापत्स्यते अग्रतः प्राकस्थेन तत्को दंड भिन्नमहिगृह पुरतः समुत्थ यत्ने प्राक् धनुर्यो वर्षाकाले भवति इति वृद्धाः कीदृशं
रत्नछायानां नीलपीतलोहितादीनां समूहीभावस्तद्वत्पूर्णानीयं पंचवर्णरत्नदीप्तिविताननिभमित्यर्थः हेमेघ येन कोदंडखंडेन तव मेवकांपू
रीरं अत्यर्थं शोभां लप्स्यते कस्येव वह्नत्र वल्लवरूपस्य हरेरिव कृष्णस्य वपुः मयूरपिच्छेन कांतिं पुष्यति तथा युष्माकमपीत्यर्थः १५ त्वय्यायत्तमि
ति भोषनकृषिफलं त्वय्यायत्तमिति भ्रूविकारानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानस्त्वं सद्यः सीरोत्कषणसुरभिक्षेत्रं किंचित्मा

रत्नछायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्रभवति धनुःखंडमाखंडलस्य येन श्यामं वपुरतितरां कांतिमापत्स्य
ते ते वर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः १५ त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः प्रीतिस्निग्धैर्जनपदव
धूलोचनैः पीयमानः सद्यः सीरोत्कषणसुरभिक्षेत्रमारुह्य मालं किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण १६ ॥

लमारुह्य पश्चाद्भूय एवोत्तरेण लघुगतिः व्रज इदं कृषिफलं त्वय्यधीनं इति भ्रुवो विकारे कटाक्षाक्षेपे अनभिज्ञाः मुग्धाः ग्रामणीत्वात् पुनः कीदृशैः प्री
त्या स्निग्धानि मनोहराणि तैः मेघदर्शनैः नंततरं प्रीतिं कुर्वन्तीत्यर्थः एतादृशैः जनपदस्त्रीलोचनैः पीयमानः अत्यंतावलोकनेपानमुच्यते तादृशः
त्वं मनाक् मालमारुह्य तदनंतरं शीघ्रगतिर्वर्षणैः पुनरपि उत्तरस्यां दिशि गच्छ मालं ग्रामान्तराटवीनामग्रहः कीदृशं मालं तत्कालं हलकर्षेण ८
नसुरभीणि क्षेत्राणि पत्रवत् १६ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त्वामासारइति भो जलद आम्रकूटः सानुमान् साधु अध्वश्रमपरिगतं आसारप्रशमितवनोपप्लवं त्वां मूर्ध्ना वक्ष्यति मित्रे प्राप्ते सति क्षुद्रोपि प्रथमसुकृतापे
क्षया संश्रयाय विमुखो न भवति यस्तथोच्चैः स किं पुनः हे जीमूत आम्रकूटाख्यः पर्वतः धारासंपात आसारस्तेन प्रशमितो निर्वापितो दवस्य दाहो येन तं तथा मा
र्गश्रमेणाभिभूतं भवंतं मस्तकेन साधु यथा स्यात्तथा धारयिष्यति वह प्रापणे अत्रार्थान्तरोपन्यासः मित्रे सुहृदि आगमे सति नीचोपि जनः क्षुद्रो नीच
इति रत्नमालायां पूर्वोपकारः तेनाश्रयति मित्रं पराङ्मुखो न भवति यस्तथा लोकप्रसिद्ध उन्नतः स किंपुनः तस्य केव कथेत्यर्थः १७ अध्वक्लां

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः न क्षुद्रोपि प्रथमसुकृतापेक्षयासं
श्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः १७ अध्वक्लांतं प्रतिमुखगतं सानुमानाम्रकूटस्तुंगेन त्वां जलद शिरसा
धारयिष्यत्यवश्यं आसारेण त्वमपि शमयेत्तस्य नैदाघमग्निं सत्काराद्रैः फलति न चिरेणोपकारो महत्सु १८

तइति भो मेघ श्लाघ्यमानः सानुमान् आम्रकूटः अध्वक्लांतं प्रतिमुखगतं त्वां तुंगेन नैव शिरसा वक्ष्यति त्वमपि आसारेण तस्य नैदाघमग्निं शमयेः
सत्काराद्रैः उपकारः महत्सु न चिरेण फलति भो जलद स्तूयमानो नाम गिरिराम्रकूटः वर्त्मखिन्नं सन्मुखागतं भवंतं उन्नतेन मूर्ध्ना धारयिष्यति त्वमपि
आसारेण तस्य ग्रीष्मसंबंधिनं प्रस्वेदोपि निदाघः स्यान्निदाघो ग्रीष्म उच्यते इति नानार्थे अग्निं प्रशान्तिं नयतत्र हेतुमाह सत्कारेण सरसः उपकारः श्रे
ष्ठपुरुषे प्रकालांतरेण न फलति किं तु तत्क्षणमेव १८ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे॰ टी॰ छन्नोपान्त इति ॥ भो मेघ परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तोऽचलः स्निग्धवेणीसवर्णे त्वयि शिखरमारूढे अमरमिथुनप्रेक्षणीयामवस्थां नूनं या
२ स्यति क इव मध्ये श्यामः शेषविस्तारपांडुर्भुवः स्तन इव पक्वानि च तानि फलानि च तैर्द्योतन्त इति एवंभूतैः फलभारनिराकृतपत्रपुंजैरित्यर्थः काननान्येव
रसालाः घनीभूतरसालैरित्यर्थः तैराच्छादितः उपांतो यस्य सः पर्वतः श्यामकूटः स्निग्धवेणी चिक्कणकचः सवर्णो त्वयि शृंगमारूढे सति देववदंपतीनां

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे नूनं
यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां मध्ये श्यामस्तन इव भुवः शेषविस्तारपाण्डुः १८ ॥

स्पृहणीयां दर्शनीयां नूनमवश्यं निश्चिते द्वयमित्यमरः गमिष्यति क इव तव आरोहणात् कस्मात् उपान्तदेशे पीतवर्णः पृथिव्याः कुच इव स्त्रियाः स्तनोऽपि
विस्तारपांडुः चूचुके श्यामो भवति गिरिरपि पक्वैः राम्रफलैः परितः पांडुवर्णः मध्ये मेघेन श्याम इति साम्यं काननानि च आम्राश्चेति केचित्तदयुक्तं
जंबादिफलानां श्याममत्वादेरपि संभवात् १९ ॥ ६

स्थित्वा तस्मिन्निति वनचरवधूभुक्तकुंजे तस्मिन् मुहूर्त्तं स्थित्वा ततो योत्सर्गाद्द्रुततरगतिः सन् परं वर्त्म तीर्णः त्वं उपलविषमे विंध्यपादे विशीर्णां रेवां द्रक्ष्य
सि कस्मिन् कामिव गजस्य अंगे भक्तिच्छेदैर्विरचितां भूतिमिव भो मेघ किरातानां स्त्रीभिः सेविताः कुंजा यस्मिन् तन्निकुंजं कुंजो वा स्त्री विलतादिपिहि
तो दरः इत्यमरः तस्मिन् द्रोक्षणमात्रं विलंब्य जलस्य विमोचनात् अतिपूयेन प्रीघ्रं गमनं यस्य सः तस्माद्द्रेः परं मार्गमुत्तीर्णः पाषाणैर्हून्नतानतैर्विन्ध्या
प्रत्यंतपर्वते स्फुटितां नर्मदां विलोकयिष्यसि भक्तिर्विलेपे लेखायां भूतिर्विभवे लंकारे इति रत्नमालायाम् १९ तस्यास्तिक्तैरिति भो मेघ वान्तवृष्टि
स्त्वं तिक्तैर्वनगजमदैर्वासितं जंबूकुंजप्रतिहतरयं तोयमादाय गच्छेः अनिलोंतःसारं त्वां तुलयितुं न शक्ष्यति हि यतः रिक्तः सर्वो लघुर्भवति पूर्णता गौ

स्थित्वा तस्मिन् वनचरवधूभुक्तकुंजे मुहूर्त्तं तोयोत्सर्गाद्द्रुततरगतिस्तत्परं वर्त्म तीर्णः रेवां द्रक्ष्यस्युपलविषमे विंध्यपादे वि
शीर्णां भक्तिच्छेदैरिव विरचितां भूतिमंगे गजस्य २० तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिर्जंबूकुंजप्रतिहतरयं
तोयमादाय गच्छेः अंतःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय २१ ॥ ॥

रवाय भो जलद उद्गीर्णवर्षैर्येन स त्वं तिक्तरसैः सुगंधैर्वा तिक्तो रसो सुगंधौ चेति विश्वः वानगजानां किपानां दानानि तैः मदो दानमित्यमरः सुरभीकृत =
मिति विश्वः जंबूवृक्षाणां कुंजा निलतादिपिहितोदराणि तैः स्वलितो रुद्धो वायस्य भवेत्प्रतिहतः प्रतिस्खलितरुद्धयोरिति विश्वः तरसी तु रयः स्यद ०/
त्यमरः तत्तस्या नर्मदायाः पानीयं गृहीत्वा गमनं कुर्वीथाः तथा सति वायुर्मध्ये पानीयं यस्य तं त्वां परिमातुं न समर्थो भविष्यति सारो बले मज्जनी चास्थिरांपु ८८
न्याय्ये च नीरे चेति विश्वः हि यस्माद्धेतोः साररहितः सम योजनः हीनत्वं प्राप्नोति धनादिना संपूर्णता गारिष्ठत्वं निमित्तं भवति सारं तु द्रविणन्याय वारिष्ठ विपर्कंगा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भोजलदसारंगास्तेतव मार्गं सूचयिष्यंतिस्वचिह्नाभिप्रायेण या स्यंतीत्यर्थः कीदृशास्ते जललवान्मुंचतीति जललवमुचस्तस्य अत्रसारंगपूर्व्वस्यार्थेत्रयं
सारं मनोहरं गायंतिप्राव्दायंते इतिसारंगाः चातकाः अथवा सारं गच्छन्तीतिसारंगाः हरिणाः अथवा सारं प्रालिलंगाछंतीतिसारंगाः गजाः चातकपक्षे किं

नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैराविर्भूतप्रथममुकुलाः कंदलीश्चानुकच्छमू दग्धार
ण्येष्वधिकसुरभिं गंधमाघ्राय चोर्व्याः सारंगास्ते जललवमुचः सूचयिष्यंतिमार्गं २१ ॥

कृत्वानीपंकदंबकुसुमं दृष्ट्वा कीदृशं नीपं हरितं च तत्कपिशं च वृक्षपुष्टिखरास्यितत्वात्तेषां पुनः कीदृशं अर्द्धरूढैः केशरैरुपलक्षितं हरिणपक्षे कच्छं
कच्छं प्रतिस्येत्रे प्रतिकंदलीनेवोन्नेदान्दृष्ट्वा कीदृशीः कंदलीः आविर्भूतानिप्रथममुकुलानि गुच्छकानि यासुताः गजपक्षे उर्व्याः पृथिव्याः दग्धारण्येषुअ १०
धिकसुरभिं गंधं आघ्राय पिवन्तित्वा इत्यर्थः २१ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अंभोविन्दुग्रहणेति भो जलद सिद्धाः देवविशेषाः स्तनितसमये गर्जितसमये त्वामासाद्य प्राप्य प्रियसहचरीसंभ्रमालिंगितानि मानयिष्यंति स्वीकरि
ष्यंति प्रियसहचरीणां प्रियवल्लभानां संभ्रमेन विलासेन सह आलिंगितानि प्रियसहचरीसंभ्रमालिंगितानि कथंभूताः सिद्धाः अंभोविंदुग्रहणरभसा
श्चातकान्वीक्षमाणाः विलोकमानाः अंभोविंदूनां जलकणानां ग्रहणे रभसाः उत्सुकाः अंभोविंदुग्रहणरभसास्तान् पुनः कथंभूताः सिद्धाः श्रेणीभू

अंभोविंदुग्रहणरभसाश्चातकान्वीक्षमाणाः श्रेणीभूताः परिगणनया निर्दिशंतो बलाकाः त्वामासाद्य स्तनितसमये
मानयिष्यंति सिद्धाः सोत्कंपानि प्रियसहचरीसंभ्रमालिंगितानि २२ उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते शुक्लापांगैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान् गंतुमा
शु व्यवस्येत् २३

ताः बलाकाः परिगणनया निर्दिशंतः कथयंतः २२ उत्पश्यामीति हे सखे भो जलद ते तव पर्वते पर्वते कालक्षेपं उत्पश्यामि विलोकयामि किंविशिष्टस्य
ते द्रुतमपि शीघ्रमपि प्रियार्थं यियासोः गंतुमिच्छोः किंविशिष्टे पर्वते ककुभसुरभौ ककुभैः अर्जुनवृक्षैः सुरभिः ककुभसुरभिः तस्मिन् भो जलद
भवान् त्वं कथमपि महता कष्टेन आशु शीघ्रं गंतुं व्यवस्येत् व्यवसायं कुर्यात् किं कृत्वा शुक्लापांगैः मयूरैः केकाः मयूरवाणीः स्वागतीकृत्य स्वागताः
अस्वागता अस्वागता स्वागती कृत्वेत्यर्थः कीदृशः भवान् प्रत्युद्यातः चलितः किंविशिष्टैः शुक्लापांगैः सजलैः जलेन नेत्राणि येषां तैः २३ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे० टी० पांडुच्छायेति भोजलद दशार्णाः देशविशेषाः त्वयि आसन्ने सति त्वयि निकटे सति कतिपयदिनस्थायिहंसाः कथंभूताः दशार्णाः परिणतफल
२१ श्यामजंबूवनांताः परिणतैः पक्वैः फलैः श्यामजंबूवनांताः जंबूवनप्रदेशाः येषु ते पुनः कथंभूताः दशार्णाः उपवनानां वृतयो येषु ते ते षुछेप
नार्थं कंटकद्रुमाणामावलिका वृत्तिः पुनः कथंभूता दशार्णाः गृहबलिभुजां गृहचटकानां नीडारंभैः कुलायप्रारंभैः आकुलाः मचैत्याः पूजित
वृक्षाः निजगृहाणि वा येषु ते किंविशिष्टैः केतकैः सूचिभिः अग्रैर्भिन्नानि तैः २४ भोजदवेत्रवत्याः नद्याः पयः पास्यसि पानं करिष्यसि किंविशिष्टैः ॥

पांडुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर्नीडारंभैर्गृहबलिभुजामाकुलग्रामचैत्याः त्वय्यासन्ने परिणतफलश्या
श्यामजंबूवनांताः संपत्स्यंते कतिपयदिनस्थायिहंसा दशार्णाः २४ तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा
त्वा सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा तीरोपांतस्तनितसुभगं पास्यसि स्वादुयस्मात् सभ्रूभंगं मुखमिव पयो वेत्रवत्या

शिष्टं पयः चलोर्मि चलंतः ऊर्मयः कल्लोलाः यत्र तत् पुनः किंविशिष्टं पयः स्वादु मधुरं किं कृत्वा तेषां दशार्णानां राजधानीं गत्वा कीदृशीं राजधानीं
दिक्षु प्राच्यादिषु प्रथितां विदिशा इति लक्षणं नाम यस्याः सा तां पुनः किं कृत्वा सद्यः तत्कालं अविकलं संपूर्णं फलं कामकत्वस्य कामुकभावस्य लब्ध्वा प्राप्य
कथं यथा भवति तथा तीरोपान्तस्तनितसुभगं यथा स्यादेवं तथा तीरोपांतेन तटपर्यंते स्तनितसुभगं गर्जितसुभगं पटुकर्म तत्तथा पयः किमिव वेत्र
वत्याः सभ्रूभंगं मुखमिव भ्रूभंगसहितं वदनमिव भ्रूभंगस्थानीयाः ऊर्मयः जलं मुखस्थानीयं यथा कश्चित्कामी कांतायाः मुखं पिबति कामुकत्व सफलं कामित्वं भविष्यति ॥ २५ ॥ २१

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नीचैरिति भो जलद पूर्णेन्दे प्रो त्वं विश्रामहेतोः निवासहेतोः नीचैराख्यं खर्वाभिधानं गिरिं पर्वतं अधिवसेः आश्रये निवासं कुर्याः नीचैरित्याख्या संज्ञा य
स्य सः तं कथंभूतं गिरिं प्रौढपुष्पैः कदंबैः कदंबवृक्षैः त्वत्संपर्कात् पुलकितमिव यः गिरिः पौरांगनाणां उद्दामानि स्फाराणि यौवनानि तारुण्यानि शिलावे
श्मभिः शिलागृहैः प्रथयति विस्तारयति किंविशिष्टैः शिलावेश्मभिः पण्यस्त्रीरतिपरिमलोद्गारिभिः पण्यस्त्रीणां रतिपरिमलं संभोगपरिमलं उद्गिरं
तीत्येवं शीलाः पण्यस्त्रीरतिपरिमलोद्गारिणस्तैः पण्यस्त्रीरतिपरिमलोद्गारिभिः २६ विश्रान्त इति भो जलद त्वं विश्रान्तः सन् व्रज गच्छ किं कुर्वन् नगन

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोस्त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदंबैः यः पण्यस्त्रीरतिपरिमलोद्गारिभि
र्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि २६ विश्रान्तस्सन् व्रज नगनदीतीरजातानि सिंचन्नुद्यानानां नव
जलकणैर्यूथिकाजालकानि गंडस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां छायादानात्क्षणपरिचितः पुष्पलावीमुखानां २७

दीतीरजातानि उद्यानानां यूथिकाजालकानि सिंचन् नगनद्यः पर्वतनद्यः तासां तीरे जातानि नगनदीतीरजातानि यूथिकानां जालानि जालकानि
कलिकाः कैः नवजलकणैः एवं पुष्पलावीमुखानां छायादानात् क्षणपरिचितः किंविशिष्टानां पुष्पलावीमुखानां गंडस्वेदापनयनरुजाक्लान्तक
र्णोत्पलानां गंडस्वेदस्य अपनयनं मेवस्फोटनमेव रुक् रोगः गंडस्वेदापनयनरुक् तया क्लान्तानि कर्णोत्पलानि कर्णे कमलानि येषां तानि क्लान्तक
र्णोत्पलानीति तेषां २७ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भोजलद भवतस्तवयद्यपि वक्रः पंथास्तथापि उज्जयिन्याः सौधोत्संगप्रणयविमुखः मास्म भूः सौधानां गृहाणां उत्संगास्तत्र यः प्रणयः स्नेहस्तस्माद्विमुखः प
राङ्मुखः किंविशिष्टस्य भवतः उत्तराशां उत्तरदिशं प्रस्थितस्य भो जलद तत्र उज्जयिन्यां पौरांगनानां नागरस्त्रीणां लोचनैर्नेत्रैर्यदि त्वं न रमसे तदा वंचितो
सि किंविशिष्टैर्लोचनैः लोलापांगैः पुनः किंविशिष्टैर्लोचनैः विद्युद्दामभिः विद्युन्मालायाः यत्स्फुरितं तद्वत्तच्चकितानि विद्युद्दामस्फुरितचकितानि तैः
२८ भोजलद निर्विंध्यायाः रसाभ्यंतरं सन्निपत्य त्वं पथि मार्गे भव विंध्यान्निर्गता निर्विंध्या अर्थात् नर्मदा तस्याः निर्विंध्यायाः रसस्य अभ्यंतरं स्त्रीपक्षे रसत्

वक्रः पंथा यदपि भवतः प्रस्थितस्योत्तराशां सौधोत्संगप्रणयविमुखो मास्म भूरुज्जयिन्याः विद्युद्दामस्फुरितचकितैस्तत्र पौरां
गनानां लोलापांगैर्यदि न रमसे लोचनैर्वंचितोसि २८ वीचीक्षोभस्तनितविहगश्रेणिकांचीगुणायाः संसर्पंत्याः स्खलित
सुभगं दर्शितावर्तनाभेः निर्विंध्यायाः पथि भव रसाभ्यंतरं सन्निपत्य स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु २९ ॥

स्वभृंगानादेः अभ्यंतरं किंविशिष्टायाः निर्विंध्यायाः वीचीनां लहरीणां क्षोभेण सद्दायमानायाः पुनः किंविहगश्रेणिकांचीगुणायाः विहगानां पक्षि
णां श्रेणी पंक्तिः सैव कांचीगुणो यस्याः पुनः किंविशिष्टायाः स्खलितसुभगं मनोहरं यथास्यात्तथा संसर्पंत्याः चलंत्याः पुनः किंविशिष्टायाः दर्शिता
वर्तनाभेः दर्शितः आवर्तः जलभ्रम एव नाभिर्यस्याः सा तस्याः हि यतः स्त्रीणां प्रियेषु विभ्रमः विलासः आद्यं प्रणयवचनं अन्योपि यथा कामी भार्यायाः
रसाभ्यंतरं भुंक्ते पथि भवति सा च क्षोभेण स्तनितकांचीगुणा भवति स्खलितसुभगं च सर्पंती नाभिं दर्शयंती सुक्तिलेपा: २९ ॥ ॥

वेणीभूतेति भोसुभग जलरसा नदी येन विधिना कार्श्यं दुर्बलतां त्यजति स विधिस्त्वया उपपाद्यः कर्त्तव्यः वर्षाकाले जलहीना कृशा नदी जलपूरितास्थू-
ला कार्श्यं त्यजतीत्यर्थः सा किं कुर्वंती तेन त्वत्सौभाग्यं विरहावस्थया व्यंजयंती ३० प्राप्यावंतीनिति भो जलद त्वं पूर्वोद्दिष्टां पूर्वकथितां विशालां पुरीं अनुसर गच्छ किं विशि-
ष्टां विशालां श्रीविशालां श्रिया लक्ष्म्या विशालां विस्तीर्णां श्रीविशालां तां किं कृत्वा अवंतीन् मालवदेशान् प्राप्य लब्ध्वा किं विशिष्टान् अवंतीन् उदयनकथा-

वेणीभूतप्रतनुसलिलां तामतीतस्य सिंधुः पांडुच्छायां तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः सौभाग्यं ते सुभग विरहावस्थया व्यं-
जयंती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ३० प्राप्यावंतीनुदयनकथाकोविदग्रामवृद्धान् पूर्वोद्दिष्टामनुसर पु-
रीं श्रीविशालां विशालां स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां शेषैः पुण्यैर्हृतमिव दिवः कांतिमत् खंडमेकं
३१ दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः यत्र स्त्रीणां हरति सुर-
तग्लानिमंगानुकूलः शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ३२ ॥

कोविदग्रामवृद्धान् उदयनकथायां वत्सराजकथायां कोविदाः पंडिताः ग्रामवृद्धाः ये सुतेतान् विशालां किमिव दिवः स्वर्गस्य एकं खंडमिव किं विशि-
ष्टं खंडं कांतिमत् शोभायुक्तं पुनः किं विशिष्टं खंडं गां गतानां भूमिं प्राप्तानां स्वर्गिणां देवानां शेषैः पुण्यैः हृतं क सति सुचरितफले पुण्यफले स्वल्पीभूते स-
ति तुच्छीभूते सति ३१ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे॰टी॰ दीर्घीकुर्वन्निति भो जलद यत्र यस्यां उज्जयिन्यां शिप्रावातः स्त्रीणां सुरतग्लानिं हरति स्फोटयति किं विशिष्टः शिप्रावातः अंगानुकूलः पुनः किं विशिष्टः शि
१२ प्रावातः तत्प्रत्यूषे प्रभाते षु स्फुटितकमलामोदमैत्रीकषायः स्फुटितानां प्रफुल्लानां कमलानां यः आमोदः परिमलः तस्य या मैत्री परस्परसंबंधनं वा कषा
यः परिमलस्य स्फुटितकमलामोदमैत्रीकषायः शिप्रावातः किं कुर्वन् पटुना मदेन उन्मादेन कलं मनोहरं पटु मदकलं सारसानां कूजितं दीर्घीकुर्वन्
शिप्रावातः कः इव प्रियतम इव किं विशिष्टः प्रियतमः प्रार्थनाचाटुकारः प्रार्थनायां रतियाच्ञायां चाटु तिकुरुते यति प्रार्थनाचाटुकारः अन्योपि प्रियतमः
कूजितं रतिश्रान्तिं दीर्घीकुरुते आमोदकषायश्च भवति तत्प्रत्यूषे रतिभावार्थः ३२ हारांस्तारानिति भो जलद यस्यां नगर्यां सलिलनिधयः समुद्राः तो

हारांस्तारांस्तरलगुटिकान्कोटिशः शंखशुक्तीः शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् यस्यां दृ
ष्ट्वा विपणिरचितान्विद्रुमाणां च भंगान्संलक्ष्यंते सलिलनिधयस्तोयमात्रावशेषाः ३३ ३३ ॥

यमात्रावशेषाः जलमात्रावशेषाः संलक्ष्यंते ज्ञायंते किं कृत्वा विपणिरचितान् हट्टरचितान् तारान् उज्ज्वलान् हारान् दृष्ट्वा किं विशिष्टान् हारान् तरल
गुटिकान् तरलाश्च चला गुटिका मध्यमणयः येषां ते तरलगुटिकास्तान् तरलगुटिकान् पुनः किं कृत्वा विपणिरचितान् कोटिशः शंखशुक्तीर्दृष्ट्वा शं
खाः दक्षिणावर्त्ताः शुक्तयः मौक्तिकमातरः शंखाश्च शुक्तयश्च शंखशुक्तयः ताः पुनः किं कृत्वा विपणिरचितान् शष्पश्यामान् मरकतमणीन् दृष्ट्वा
शष्पं बालतृणं तद्वत् श्यामाः नीलाः शष्पश्यामास्तान् किं विशिष्टान् मरकतमणीन् उन्मयूखप्ररोहान् पुनः किं कृत्वा विपणिरचितान् विद्रुमाणां प्र १२
वालानां भंगान्दृष्ट्वा ३३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भो जलद यत्र यस्यां नगर्यां अभिज्ञो जनः चतुरो जनः आगंतून् प्राघूर्णिकान् बंधून् रमयति इतीति किं अत्र अस्मिन्स्थाने वत्सराजः प्रद्योतस्य नृपस्य प्रियदुहितरं प्रियपुत्रीं जह्रे जहार अत्र अस्यां नगर्यां तस्यैव राज्ञः प्रद्योतस्य हैमं सौवर्णं तालद्रुमवनं अभूत् बभूव अत्र किल इत्यापन्नवादे प्राप्नवादे नलगिरिर्गंपहस्ती दर्प्यात् मदात् स्तंभं उत्पाट्य उद्भ्रांतः इति रमयति ३४ जालोद्गीर्णैः इति भो जलद त्वं चंडीश्वरस्य ईश्वरस्य धाम गृहं यायाः गच्छेः किंविशिष्टस्य चंडीश्वरस्य त्रिभुवनगुरोः त्रिभुवनगुरोः त्रिभुवनपूज्यस्य किंविशिष्टं धाम पुण्यं पवित्रं पुनः किंविशिष्टं धाम गंधवत्याः नद्याः मरु-

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः अत्रोद्भ्रांतः किल नलगिरिः स्तंभमुत्पाट्य दर्पाद् इत्यागंतून् रमयति जनो यत्र बंधूनभिज्ञः ३४ जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूमैर्बंधुप्रीत्या भवनशिखिभिर्दे त्तनृत्योपहारः हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नांतरात्मा नीत्वा खेदं ललितवनितापादरागांकितेषु ३५ ३५ ॥

द्भिर्धूतोद्यानं कंपितोपवनं किंविशिष्टैः मरुद्भिः कुवलयरजोगंधिभिः कुवलयरजसां कुमुदकिंजल्कानां परागाणां गंधो विद्यते येषु तैः पुनः किंविशिष्टैः मरुद्भिः तोयक्रीडानिरतयुवतिस्नानतिक्तैः तोयक्रीडायां जलक्रीडायां निरताः याः युवतयः तासां स्नानेन तिक्ताः मिश्रिताः तोयक्रीडानिरतयुवतिस्नानतिक्तास्तैः किंविशिष्टस्त्वं गणैर्नंद्यादिभिः सादरं यथास्यादेवंतया इति वीक्ष्यमाणः इतीति किम् ३५ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भर्त्तुः ईश्वरस्य कंठच्छविः कंठकान्तिः पुनः किं विशिष्टस्त्वं जालोद्गीर्णैः गवाक्षनिःसृतैः केशसंस्कारधूमैः उपचितवपुः स्थूलशरीरः केशानां संस्कारो धूपदानं तस्य
धूमाः केशसंस्कारधूमास्तैः पुनः किं विशिष्टस्त्वं भवनशिखिभिर्गृहमयूरैः बंधुप्रीत्या बंधुस्नेहेन दत्तनृत्योपहारः दत्तं नृत्यमेव उपहारः पूजा यस्य सः पुनः किं विशि
ष्टस्त्वं अध्वखिन्नान्तरात्मा अध्वना मार्गेण खिन्नः श्रांतः अन्तरात्मा यस्य सः किं कृत्वा अस्याः उज्जयिन्याः हर्म्येषु गृहेषु खेदं नीत्वा किं विशिष्टेषु हर्म्येषु कुसुमसुरभि
षु पुष्पसुगंधिषु पुनः किं विशिष्टेषु हर्म्येषु ललितवनितापादरागांकितेषु मनोहरस्त्रीचरणालक्तकचिन्हेषु ललितवनितानां मनोमनोहरस्त्रीणां पादर-

भर्त्तुः कंठच्छविरिति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चंडीश्वरस्य धूतोद्यानं कुवलयरजोगंधिभिर्गंधवत्या
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ३६ अप्यन्यस्मिन्जलधर महाकालमासाद्य काले स्थातव्यं ते नयनविषयं याव
दत्येति भानुः कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीयामामंद्राणां फलमविकलं लप्स्यसे गर्जितानाम् ३७ ॥

रागैः अंकितानि तेषु ३६ अप्यन्यस्मिन्निति भो जलधर भानुः सूर्यः यावत् नयनविषयं नेत्रगोचरं अत्येति अतियाति तावत्ते त्वया स्थातव्यं किं कृत्वा अन्य
स्मिन्नपि काले महाकालं आसाद्य प्राप्य त्वं किं कुर्वन् शूलिनः महेशस्य संध्याबलिपटहतां कुर्वन् संध्याबलेः संध्यापूजायाः पटहता पटहभावस्त्वा
दित्रवादनं संध्याबलिपटहता तां पुनः किं विशिष्टां संध्याबलिपटहतां श्लाघनीयां पूजनीयां भो जलद त्वं आमंद्राणां गंभीराणां गर्जितानां अविकलं
फलं संपूर्णफलं लप्स्यसे प्राप्स्यसे ३७ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पादन्यासेति भो जलद यत्र यस्यां उज्जयिन्यां वेश्याः त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आमोक्ष्यन्ते पातयिष्यन्ति मधुकरश्रेणिवत् भ्रमरश्रेणिवत् दीर्घाः
मधुकरश्रेणिदीर्घास्तान् वर्णं प्रति कटाक्षानां त्र्यपाङ्गगतिः सिता असिता सितासिता किं कृत्वा त्वत्तः भवतः नखपदसुखान् वर्षाग्रविन्दून् नवजलकणान् प्रा
प्य लब्ध्वा नखपदेषु नखक्षतेषु सुखाः सुखकारिणः नखपदसुखास्तान् किं विशिष्टाः वेश्याः पादन्यासक्वणितरसनाः पादन्यासेन चरणक्रमेण क्वणि
ता शब्दिता रसना मेखला यासां ताः पुनः किं विशिष्टाः वेश्याः चामरैर्वालव्यजनैः क्लान्तहस्ताः खिन्नहस्ताः किं विशिष्टैश्चामरैः लीलावधूतैः लीलावचा
लितैः पुनः किं विशिष्टैः चामरैः रत्नच्छायाखचितवलिभिः रत्नच्छायाप्रभा रत्नकान्त्या खचिता युक्ता वलिः आवन्नेविशेषो येषां तैः रत्नच्छायाखचितवलयैः

पादन्यासक्वणितरसनास्तत्र लीलावधूतैः रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्र
विन्दूनामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ३८ पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः सान्ध्यं तेजो विकसितजपापु
ष्परक्तं दधानः नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ३९ ॥ ॥ ॥

३८ भो जलद त्वं पशुपतेः महेशस्य आर्द्रनागाजिनेच्छां नृत्यारम्भे नृत्यकाले हरस्फोटय किं विशिष्टस्त्वं भुजतरुवनं मण्डलेन आवेष्टनेनाभिलीनः किं वि
शिष्टस्त्वं पश्चात् पृष्ठतः उच्चैरतिशयेन सान्ध्यं तेजो दधानः किं विशिष्टं तेजः विकसितजपापुष्परक्तं विकसितं फुल्लं यत् जपापुष्पं तद्वत् रक्तं विकसितज
पापुष्परक्तं पुनः किं विशिष्टस्त्वं भवान्या पार्वत्या शान्तोद्वेगस्तिमितनयनं यथा स्यात् एवं तथा दृष्टभक्तिः शान्तोद्वेगो गतसन्तापः अतएव स्तिमितेन निश्चलेन नय
नेन यस्मिन् कर्मणि तत् शान्तोद्वेगस्तिमितनयनं कर्म ३९ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे·टी·
२५

गछंतीनामिति भोजलद तत्र तस्याः उज्जयिन्यां नक्तं रात्रौ योषितां स्त्रीणां उर्वीम्प्रथ्वीं दर्शय प्रकटनं रोपय तत्पथे भूपमार्गे किंविशिष्टे नरपतिपथे सूचिभेद्यैस्त
मोभिः रुद्धालोके रुद्धः आलोकः प्रकाशो यस्मिन्स तस्मिन् कया सौदामन्या विद्युता किंविशिष्टया सौदामन्या कनकनिकषस्निग्धया कनकनिकषवत्कनकरे
खेव स्निग्धा कनकनिकषस्निग्धा तया किंविशिष्टानां योषितां रमणवसतिं प्रियवसतिं गच्छंतीनां भोजलद त्वं तोयोत्सर्गस्तनितमुखरः मास्मभूः माभवेः
तोयोत्सर्गेण जलवर्षणेन स्तनितं गर्जितं तस्मात् मुखरः वाचालः तोयोत्सर्गस्तनितमुखरः भोजलद ताः नार्यः विक्लवा विह्वला भविष्यंति ४०

गछंतीनां रमणवसतिं योषितां तत्र नक्तं रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः सौदामन्या कनकनिकषस्निग्धया
दर्शयोर्वीं तोयोत्सर्गस्तनितमुखरो मास्मभूर्विक्लवास्ताः ४० तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां नीत्वा रात्रीं चिरवि
लसनात् खिन्नविद्युत्कलत्रः दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं मंदायंते न खलु सुहृदामभ्युपेतार्थकृत्याः ४१ ॥

तां कस्यांचिदिति भोजलद भवान् त्वं पुनरपि सूर्ये दृष्टे सति अध्वशेषं वाहयेत् गच्छेत् किं कृत्वा कस्यांचिद्भवनवलभौ तां रात्रीं नीत्वा अतिक्रम्य किं
विशिष्टस्त्वं चिरविलसनात् चिरवर्षणात् खिन्नविद्युत्कलत्रः खिन्ना विद्युदेव कलत्रं यस्य सः किंविशिष्टायां भवनवलभौ सुप्तपारावतायां सुप्ताः पारा
वता यस्यां सा तस्यां अभ्यर्थ्यः युक्तः सुहृदां मित्राणां अभ्युपेतार्थकृत्याः अंगीकृतकार्य्याः पुरुषाः न खलु मंदायंते न खलु अलसायंते ४१ २५

भोपयोद तस्मिन्काले वर्षाकाले खंडितानां योषितां स्त्रीणां प्रणयिभिर्भर्तृभिः शांतिं उपशमं नेयं उपसमं प्रापणीयं खंडिताचैषा निद्राकषायक
लुषीकृततामश्रने त्रो नारी न खेदं न विप्रोषविचित्रितागः यस्याः कुतोपि गृहमेति पतिः प्रभाते सा खंडितेति कथिता कविभिः पुराणैरिति खंडिता
लक्षणं अतः अस्मात्कारणात् भानोः सूर्यस्य वर्त्म मार्गं आशु शीघ्रं त्यज मुंच भोजलद सोपि सूर्योपि नलिन्याः कमलिन्याः कमलवदनात् प्रालेया
स्रं हर्तुं स्फोटयितुं प्रत्यावृत्तः त्वयि कररुधि सति अनल्पाभ्यसूयः स्यात् अनल्पा बह्वी अभ्यसूया ईर्ष्या यस्य सः ४२ गंभीरायाः इति भो मेघ गंभी

तस्मिन्काले नयनसलिलं योषितां खंडितानां शांतिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु प्रालेयास्रं कमलवदनात्सोपि
हर्तुं नलिन्याः प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ४२ गंभीरायाः पयसि सरितश्चेतसीव प्रसन्ने छायात्मापि प्रकृति
सुभगो लप्स्यते ते प्रवेशम् तस्मादस्याः कुमुदविशदान्यर्हसि त्वं लघीयान्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ४२

रायाः सरितो नद्याः पयसि जले तेन बिंबात्मापि प्रवेशं लप्स्यते प्राप्स्यति छायाएव आत्मा स्वरूपं यस्य स छायात्मा यारूपो जीवस्तुल्यार्थः पयसि क
स्मिन्निव प्रसन्ने चेतसीव प्रसन्ने चित्ते स्वभोजलद तस्मात् अस्याः गंभीरायाः चटुलशफरोद्वर्तनप्रेक्षितानि लघीयान् मोघीकर्तुं त्वं न अर्हसि नयो
ग्यो भवसि चटुलानां शफराणां मत्स्यानां यानि उद्वर्तनानि तान्येव प्रेक्षितानि अवलोकनानि चटुलशफरोद्वर्तनप्रेक्षितानि किंविशिष्टानि चटु
लशफरोद्वर्तनप्रेक्षितानि कुमुदविशदानि यथा कश्चित्कामी कस्याश्चित् नायिकायाः चेतसि प्रविशति तस्याः प्रेक्षितानि निःफलीकर्तुं नार्हसि इति

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तस्या इति हे सखे तेन त्वया प्रस्थानं कथमपि महता कष्टेन भावि भविष्यति किंविशिष्टस्य ते लंबमानस्य चलनापलंबितकायस्य किं कृत्वा तस्याः नद्याः नीलं सलिलवस
नं जलवस्त्रं हृत्वा अपहृत्य सलिलमेव वसनं वस्त्रं सलिलवसनं किंविशिष्टं सलिलवसनं अप्राप्तवानीरशाखं प्राप्ता मिलिता वानीराणां वेतसानां शाखा येन
तत्तत्पुनः किंविशिष्टं सलिलवसनं मुक्तरोधोनितंबं मुक्तं रोध एव तटमेव नितंबो जघनप्रदेशो येन तत् उत्प्रेक्षते किंचित्करधृतमिव हस्तगृहीतमिव
यथा कश्चित् कामी नायिकायाः नितंबवस्त्रं अपहृत्य प्रस्थानं लभते अयमर्थः युक्तः कः लब्धास्वादः लब्धरसः विपुलजघनां नारीं विहातुं
त्यक्तुं समर्थः अपि तु न कोपि ४४ त्वन्निष्यंद इति भो जलद तेन त्वं नीचैः शीतो वायुरुपास्यति किंविशिष्टस्य ते देवपूर्वं गिरिं देवगि

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं हृत्वा नीलं सलिलवसनं मुक्तरोधोनितंबं प्रस्थानं ते कथमपि सखे लंबमान
स्य भावि लब्धास्वादो विपुलजघनां को विहातुं समर्थः ४४ त्वन्निष्यन्दोच्छ्वसितवसुधागंधसंपर्करम्यः स्रोतोरंध्रध्व
नितसुभगं दंतिभिः पीयमानः नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते शीतो वायुः परिणमयिता काननोदुंबराणाम् ४५

रिं नामानं पर्वतं उपजिगमिषोः गंतुमिच्छोः किंविशिष्टो वायुः स्रोतोरंध्रध्वनितसुभगं पथा स्यादेवं तुष्यात् दंतिभिः पीयमानः स्रोतसां रंध्राणि छिद्राणि त
त्र पतत् ध्वनितं तत् तद्वत् सुभगं यथा तत् कर्म तत् स्रोतोरंध्रध्वनितसुभगं पुनः किंविशिष्टो वायुः काननोदुंबराणां वनोदुंबरफलानां परिणमयिता पक्वयिता
काननतो नीवननाउदुंबराणि जंतुफलानि काननोदुंबराणि तेषां पुनः किंविशिष्टो वायुः त्वन्निष्यंदोच्छ्वसितवसुधागंधसंपर्करम्यः त्वन्निष्यंदेन
त्वद्वर्षणेन उच्छ्वसिता या वसुधा पृथ्वी तस्याः गंधसंपर्केण रम्यः मनोहरः त्वन्निष्यन्दोच्छ्वसितवसुधागंधसंपर्करम्यः ४५ ४५ ॥ २६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तत्रस्कंदमिति भोजलद तत्र देवगिरौ भवान् त्वं स्कंदं स्वामिकार्त्तिकेयं पुष्पासारैः स्नपयतु किंविशिष्टः भवान् पुष्पमेघीकृतात्मा पुष्पमेघीकृतः मेघस्वरूपीकृतः
आत्मा यस्य सः किंविशिष्टं स्कंदं नियतवसतिं निश्चितवसतिं किंविशिष्टैः पुष्पासारैः व्योमगंगाजलार्द्रैः व्योमगंगाजलेन आकाशगंगाजलेन आर्द्रैः व्योमगं
गाजलार्द्रैः हे भोजलद हि निश्चितं तत्तेजः नवशशिभृता महेशेन हुतवहमुखे संभृतं तद्दत्तं किमर्थं वासवीनां इन्द्रसंबंधिनीनां चमूनां रक्षाहेतोः किंवि
शिष्टं तेजः अत्यादित्यं आदित्यादतिक्रांतं तत्तेजः सं अत्यादित्यं ४६ कथा चात्र पार्वतीरतासक्तस्य सदवगतस्य शक्रव्यसनायदेन्द्रः वह्निं प्रेषितवान् तं दृष्ट्वा भ
गवान् चुकोप पार्वत्या उपशापमितः ततो भगवान् समरतरसस्त्वया विघ्नितः इत्यपक्रोधपूर्वं निजमदच्युतं शुक्रं पार्वत्याः पोने हुतरूप अग्निमुखे धृतवा

तत्र स्कंदं नियतवसतिं पुष्पमेघीकृतात्मा पुष्पासारैः स्नपयतु भवान् व्योमगंगाजलार्द्रैः रक्षाहेतोर्नवशशिभृता वासवीनां च
मूनामत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ४६ ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि
कर्णे करोति धौतापांगं हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथाः ४७ ॥ ५ ॥

न्हि स्वशुक्रतेजसा दह्यमानः समुद्रे वीतवान् ततस्त्वपसरसि एकशेषं वीतवान् तत्र जलक्रीडाकुर्वतीनां षण्णां कृत्तिकानां योनिषु प्रविष्टं ततः षण्मुखः का
र्त्तिकेयो भूत् ज्योतिरिति भोजलद पश्चात्त्वं पावकेः कार्त्तिकेयस्य तं मयूरं गर्जितैः नर्त्तयेथाः नृत्यं कारयेथाः किंविशिष्टं मयूरं हरशशिरुचा महेशचन्द्र
कांत्या धौतापांगं क्षालितनेत्रप्रांतं किंविशिष्टैः गर्जितैः अद्रिग्रहणगुरुभिः अद्रिग्रहणगुरूणि तैः भोजलद मयूरस्य बर्हं पिच्छं भवानी पार्वती पुत्रप्र
म्णा पुत्रस्नेहेन कर्णे करोति कर्णे धारयति किंविशिष्टं बर्हं ज्योतिर्लेखावलयि ज्योतिर्लेखानां वलयो विद्यते यस्य तत् पुनः किंविशिष्टं बर्हं गलितं स्वयं च्युतं

पतितं किंविशिष्टं कर्णे कुवलयदलप्रापि कुवलयद
लं कुमुदपत्रं प्राप्नोतीति कुवलयदलप्रापि ४७

आराध्यैनमिति भो जलद त्वं सुरभितनयालंभजां मानयिष्यन् सन् व्यालंबेथाः विलंबं कुर्याः। किं कृत्वा एनं शरवणभवं कार्त्तिकेयं आराध्य किंविशिष्टस्त्वं उल्लंघिता-
ध्वा उल्लंघितमार्गः पुनः किंविशिष्टः त्वं सिद्धद्वंद्वैः सिद्धमिथुनैर्मुक्तमार्गः सिद्धाः देवविशेषाः तेषां द्वंद्वानि तैः कस्मात् जलकणभयात् किंविशिष्टैः सिद्धद्वं-
द्वैः वीणिभिः वीणाधारकैः किंविशिष्टां सुरभितनयालंभजां रंतिदेवस्य राज्ञः मालवदेशस्य राज्ञः स्रोतोमूर्त्या नदीमूर्त्या भुवि परिणतां कीर्त्तिं सुरर-
भिः कामधेनुः तस्याः तनया पुत्री सुरभितनया तस्याः आलंभः मंत्रपूर्वको वधः तस्माज्जातां सुरभितनयालंभजातां ४८ त्वयादातुमिति भो जलद त-

आराध्यैनं शरवणभवं देवमुल्लंघिताध्वा सिद्धद्वंद्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः व्यालंबेथाः सुरभितनयालंभजां मान-
यिष्यन् स्रोतोमूर्त्या भुवि परिणतां रंतिदेवस्य कीर्त्तिम् ४८ त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे तस्याः सिंधोः पृथुम-
पि तनुं दूरभावात्प्रवाहम् प्रेक्षिष्यंते गगनगतया दूरमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येंद्रनीलम् ४९ ॥

स्याः सिंधोः नद्याः प्रवाहं गगनगतया देवाः प्रेक्षिष्यंते विलोकयिष्यंति किंविशिष्टं प्रवाहं दूरभावात् पृथुमपि तनुं तुच्छं क सति त्वयि जलं आदातुं ग्रहीतुं अ-
वनते सति नम्रीभूते सति किंविशिष्टे त्वयि शार्ङ्गिणो वर्णचौरे वर्णं चोरयतीति वर्णचौरः तस्मिन् अर्थात् कृष्णरूपे किं कृत्वा दूरं अत्यर्थं दृष्टीः नेत्राणि
आवर्ज्य संप्राप्य प्रवाहं कमिव भुवः पृथिव्याः एकं मुक्तागुणमिव मुक्ताहारमिव किंविशिष्टं मुक्तागुणं स्थूलमध्येंद्रनीलं स्थूलः मध्ये इंद्रनीलो मणिर्यस्य स
तं ४९ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ॐ दृश्यछेपः पुरहीनतृष्वगुणाः दृष्टिपानिवेशमधुकराः
गुणगतः तेष्वांशुवंशीमं गुल्मीमिकंदद्रष्टिपातगुणगमधुक
१ श्री ग्रंथः ३८ १

ताम्रुत्तीर्य्येति मोजलदत्तां च मन्वाती उत्तीर्य्य उत्त्वं यव्रजत्वं किं कुर्वेन् सन् दृष्पुरवधूनेत्रकौतूहलानां लक्षणया दृष्पुरवधुनयनकयत्त्याणां आत्मवि
वं निजस्वरूपं पात्रीकुर्वन् विषयीकुर्वन् दृष्पुरवधूनेत्रयोः कुतूहलानि लक्षणपाकतारक्ष्याणि दृष्पुरवधूनेत्रकौतूहलानि तेषां किं विशिष्टानां नेत्रकौतूहला
हनां परिचितमूलता विभ्रमाणां परिचितः संसक्तः मूलतायाः विभ्रमो पेषु तानि तेषां पुनः किं विशिष्टानां नेत्रकौतूहलानां पक्ष्मोत्क्षेपात् पक्ष्मोद्धेकर
णात् उपरिविलसत्कृष्णसारप्रभाणां विलसंती कृष्णसारा कर्बुरा प्रभा येषां तानि तेषां पुनः किं विशिष्टानां नेत्रकौतूहलानां कुंदक्षेपानुगमधुकरश्री ।

ताम्रुत्तीर्य्य व्रजपरिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणां कुंदक्षेपानुगमधुकरश्रीमुखा
मात्मविंवं पात्रीकुर्वन् दृष्पुरवधूनेत्रकौतूहलानां ५० ब्रह्मावर्त्तं जनपदमधच्छायया गाहमानः क्षेत्रं क्षत्रप्रधनपि
शुनं कौरवं तद्भजेथाः राजन्यानां शितशरशतैर्यत्र गांडीवधन्वाः धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ५१ ॥

ग्रुषां तेषां ५० ब्रह्मावर्त्तमिति मोजलद त्वं कौरवं क्षेत्रं भजेथाः त्वं किं विशिष्टः त्वं ब्रह्मावर्त्तं जनपदं अधच्छायया नीचैच्छायया अधच्छायोभया वा गाह
मानः विलोड्यमानः ब्रह्मावर्त्तः सरस्वत्याः दृषद्वत्याश्च मध्यतः किं विशिष्टं कौरवं क्षेत्रं प्रधनपिशुनं राजन्यानां क्षत्राणां प्रधनं संग्रामः तस्य पिशुनं सू
चकं क्षत्रप्रधनपिशुनं भो मेघ यत्र कुरुक्षेत्रे गांडीवधन्वा अर्जुनः राजन्यानां राजवंश्यानां मुखानि शितशरशतैरभ्यवर्षत् ववर्ष गांडीवधन्वा कर्द्धवत्व
मिव यथा त्वं कमलानि धारापातैः अभिवर्षसे ५१ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे-टी-
१८

हित्वा हालामिति भो सौम्य तां सारस्वतीपानां आर्यांपानीयानां अभिगमं परिचयं कृत्वा त्वमपि पुण्ड्रो भविता यथा बलभद्रः बलहत्यायाः शुद्धो भूतस्तथा त्वमपीत्यर्थः किं विशिष्टः त्वं वर्णमात्रेण कृष्णः भो जलद यासा अपः लांगली सिषेवे षेवया मास किं कृत्वा हालां वारुणीं हित्वा किं विशिष्टः लांगली बंधुस्नेहात् कृष्णस्नेहात् समरविमुखः किं विशिष्टां हालां अभिमतरसां वाञ्छितरसां पुनः किं विशिष्टां हालां रेवतीलोचनांकां रेवती बलभद्रभार्या तस्या लोचनस्य अंकं चिन्हं यस्यां सा तां ५२ तस्मात् गच्छेरिति भो जलद तस्मात् कुरुक्षेत्रात् अनुकनखलं पथा स्याद् एवं तथा जन्होः कन्यां गंगां गच्छेः गमनं कुर्याः कन

हित्वा हालामभिमतरसां रेवतीलोचनांकां बंधुस्नेहात् समरविमुखो लांगली याः सिषेवे कृत्वा तासामभिगममपां सौम्य सारस्वतीनामंतः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ५२ तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां जन्होः कन्यां सगरतनयस्वर्गसोपानपंक्तिम् गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः शंभोः केशग्रहणमकरोदिंदुलग्नोर्म्मिहस्ता ५३ ॥

खलं क्षेत्रविशेषं अनुपश्चात् उद्दिश्य अनुकनखलं कनखलमुद्दिश्येत्यर्थः किं विशिष्टां जन्होः कन्यां शैलराजावतीर्णां शैलराजो हिमवान् तस्मादवतीर्णां शैलराजावतीर्णां तां पुनः किं विशिष्टां जन्होः कन्यां सगरतनयस्वर्गसोपानपंक्तिं सगरतनयानां चक्रवर्त्तिपुत्राणां स्वर्गगमने सोपानपंक्तिरिव सोपानपंक्तिः सगरतनयस्वर्गसोपानपंक्तिस्तां गंगाजलस्पर्शाः सर्वेपि सगरपुत्राः प्रेतत्वं मुक्त्वा स्वर्गं प्रापुः इति कथालेशः या गंगा गौरीवक्त्रभ्रुकुटिरचनां फेनैर्विहस्येव शंभोर्महेशस्य केशग्रहणं अकरोत् गौरीवक्त्रस्य पार्वतीमुखस्य या भ्रुकुटिरचना भ्रूभंगरचना गौरीवक्त्रभ्रुकुटिरचना तां किं विशिष्टा गा इंदुलग्नोर्म्मिहस्ता इंदौ मस्तकचंद्रे लग्ना ऊर्म्म- १८
यः कल्लोला एव हस्ता यस्याः सा ५३ ॥

तस्या इति भो जलद चेत् यदि यस्याः गंगायाः अंभः पानीयं पातुं तर्कयेः किं विशिष्टं अंभः तिर्यग् प्रवाहि पुनः किं विशिष्टं अंभः अच्छस्फटिकविशदं अ-
च्छस्फटिकवत् विशदं उज्वलं अच्छस्फटिकविशदं किं विशिष्टः त्वं व्योम्नि आकाशे पूर्वार्द्धलंवि पूर्वार्द्धे लंवते इत्येवंशीलः पूर्वार्द्धलंवी त्वं क इव सुर-
गज इव ऐरावण इव यथा ऐरावणः पूर्वार्द्धलंवी सन् गंगायाः पयः पातुं तर्कयति भो जलद ह्यो गंगा भवतस्तव छायया असौ स्थानोपगतयमुनासंगमेन अभि-
रामा मनोहरा स्यात् भवेत् अस्थाने अप्रदेशे उपगता प्राप्ता या यमुना तस्याः संगमः अस्थानोपगतयमुनासंगमस्तेन छायया किं कुर्वत्या सपदि शीघ्रं स्रो-

तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्द्धलंवी त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगंभः संसर्पंत्या सपदि भवतः स्रोतसि
छायया सा स्यादस्थानोपगतयमुनासंगमेनाभिरामा ५४ आसीनानां सुरभितशिलं नाभिगंधैर्मृगाणां तस्या एव प्र-
भवमचलं प्राप्य गौरं तुषारैः वक्ष्यस्यध्वश्रमविनयने तस्य शृंगे निषण्णः शोभां शुभ्रत्रिनयनवृषोत्खातपंकोपमेयाम् ५५

तस्मिन् प्रवाहे संसर्पंत्या चलंत्या ५४ आसीनानामिति भो जलद त्वं तस्य हिमाचलस्य शृंगे निषण्णः सन् शुभ्रत्रिनयनवृषोत्खातपंकोपमेयां शोभां
वक्ष्यसि धारयिष्यसि शुभ्रो यो असौ त्रिनयनवृषः महेशवृषः तेन उत्खातो यः पंकः तेन सदृश उपमीयते या सा शुभ्रत्रिनयनवृषोत्खातपंकोपमेया किं विशिष्टे
शृंगे अध्वश्रमविनयने किं कृत्वा तस्या एव गंगाया एव प्रभवं उत्पत्तिस्थानं अचलं प्राप्य लब्ध्वा किं विशिष्टं अचलं तुषारैः गौरं पुनः किं विशिष्टं अचलं
आसीनानां उपविष्टानां मृगाणां नाभिगंधैः कस्तूरीकागंधैः सुरभितशिलं सुगंधीकृतशिला यत्र इत्यर्थः ५५ ॥

तंचेदिति भोजलद चेत्‌यदि दवाग्निर्वनवन्हिः तं हिमाचलं वाधेत पीडयेत् क्क सति वायौ पवने सरति सति वायौ वाति सति किंविशिष्टः दवाग्निः सरलस्कं-
धसंघट्टजन्मा सरलानां देवदारुद्रुमाणां यत्स्कंधसंघट्टः प्रकांडघर्षणं तस्माज्जन्म यस्य सः पुनः किंविशिष्टः दवाग्निः उल्काक्षपितचमरीवालभारः उल्काभि-
र्वन्हिलेशैः क्षपितो ज्वालितः चमरीणां वालभारः पुच्छो येन सः भो जलद एनं हिमाचलं वारिधारासहस्रैः शमयितुं निर्वापयितुं अलं समर्थो भवसि यो-
ग्यो भवसि कविरर्थांतरन्यासमाचष्टे हि निश्चितं उत्तमानां संपदो लक्ष्म्यः आपन्नार्त्तिप्रशमनफलाः आपन्नार्त्तीनां उत्पन्नसंतापानां यत्प्रशमनं शांति-

तंचेद्वायौ सरति सरलस्कंधसंघट्टजन्मा वाधेतोल्काक्षपितचमरीवालभारो दवाग्निः अर्हस्येनं शमयितुमलं वारिधा-
रासहस्रैरापन्नार्त्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ५६ ये संरंभोत्पतनरभसाः स्वांगभंगाय तस्मिन् मुक्ताध्वानं
सपदि शरभा लंघयेयुर्भवंतम् तान् कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णान् के वा न स्युः परिभवपदं निःफलारंभय-
त्नाः ५७

निवारणं तदेव फलं यासां ताः ५६ ये संरंभ इति भो मेघ तस्मिन् हिमाद्रौ ये शरभाः भवंतं त्वां सपदि शीघ्रं लंघयेयुः किंविशिष्टाः शरभाः संरंभोत्पत-
नरभसाः संरंभेण प्रकोपेन आपतत् उत्पतनं उच्छलनं तेन रभसाः उच्छकाः संरंभोत्पतनरभसाः कस्मै स्वांगभंगाय स्वशरीरनाशाय किंविशिष्टं भवं-
तं मुक्ताध्वानं भो जलद त्वं तान् शरभान् तुमुलकरकावृष्टिहासावकीर्णान् कुर्वीथाः कुर्याः तुमुलाः रौद्राः याः करकावृष्टिः सैव हास्यं तेन अवकीर्णा-
व्याप्ताः तुमुलकरकावृष्टिहासावकीर्णाः तान् युक्तोयमर्थः वा अथवा निःफलारंभयत्नाः परिभवपदं पराभवस्थानं के पुरुषाः न स्युः अपितु सर्वे

५८ तत्रव्यक्तंदृषदिचरणन्यासमर्धेन्दुमौलेः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भो जलद तत्र तस्मिन् हिमाचले अर्द्धेन्दुमौलेः महेशस्य चरणन्यासं त्वं परीयाः प्रदक्षिणीकुर्याः किं विशिष्टं चरणन्यासं दृष[त]दि व्यक्तं प्रकटं पुनः किं विशि
ष्टं चरणन्यासं शश्वत् नित्यं सिद्धैः देवविशेषैः उपहृतबलिं दत्तपूजां किं विशिष्टस्त्वं भक्तिनम्रः भक्त्या नम्रः भक्तिनम्रः भो जलद यस्मिन् चरणन्यासे दृष्टे सति
श्रद्दधानाः सेवकाः करणविगमादूर्द्ध्वं सुरगणपदप्राप्तये संकल्पन्ते सुरगणपदस्य देवपदस्य प्राप्तिः सुरगणपदप्राप्तिः तस्यै किं विशिष्टाः श्रद्दधानाः उ
द्धूतपापाः गतकल्मषाः ५८ शब्दायन्ते इति भो जलद ननु इति निश्चये तत्र हिमाद्रौ पशुपतेर्महेशस्य समस्तः संपूर्णः संगीतार्थः गीतनृत्यवादित्रं

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः शश्वत् सिद्धैरुपहृतबलिं भक्तिनम्रः परीयाः यस्मिन् दृष्टे करणविगमादूर्द्ध्व
मुद्धूतपापाः संकल्पन्ते सुरगणपदप्राप्तये श्रद्दधानाः ५८ शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः संरक्ताभिस्त्रिपु
रविजयो गीयते किन्नरीभिः निर्ह्रादी ते मुरज इव चेत् कंदरेषु ध्वनिः स्यात् संगीतार्थो ननु पशुपतेस्तत्र भावी समस्तः ५९

प्रयोजनं भावि भविष्यति भो जलद कीचकाः सच्छिद्रवंशाः अनिलैः पवनैः पूर्यमाणाः मधुरं यथा स्यात् एवं तथा शब्दायन्ते शब्दं कुर्वन्ति भो मेघ संरक्ता
भिः किन्नरीभिः त्रिपुरविजयो गीयते भो पयोद चेत् यदि ते तव निर्ह्रादी व्यापकध्वनिः कंदरेषु विवरेषु मुरज इव स्यात् भवेत् ५९ प्रालेयाद्रि
भो जलद यत् क्रौंचरंध्रं क्रौंचपर्वतच्छिद्रं तेन क्रौंचरंध्रेण त्वं उदीचीं दिशं अनुसरेः गच्छेः किं कृत्वा प्रालेयाद्रेः तांस्तान् विशेषान् दरीवनादीन् उप
तटं तटसमीपे अतिक्रम्य उल्लंघ्य किं विशिष्टं क्रौंचरंध्रं भृगुपतियशोवर्त्म भृगुपतेः परशुरामस्य यश ५९ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे॰ टी॰ २० शोवर्त्म पुनः किंविशिष्टं क्रौञ्चरन्ध्रं हंसद्वारं हंसानां द्वारं हंसद्वारं किंविशिष्टस्त्वं तिर्यगायामशोभीति तिर्यक् कृत्वा आयामेन दैर्घ्येण शोभते इत्येवंशीलः तिर्यगा
यामशोभी त्वं कइव बलिनियमाद् विष्णोरिव अभ्युद्यतस्य ना ६० भो जलद त्वं कैलासस्य अतिथिः स्याः किं कृत्वा च पुनः ऊर्ध्वं गत्वा किंविशिष्टस्य कैलासस्य द
शमुखभुजोच्छ्वासितप्रस्थसंधेः दशमुखभुजैः रावणभुजैः उच्छ्वासिता उत्पाटिताः प्रस्थानां संधयो यस्य कैलासस्य त्रिदशवनितादर्पणस्य त्रिदशवनितानां
देवाङ्गनानां दर्पणः त्रिदशवनितादर्पणः तस्य भो जलद यः कैलासः शृङ्गोच्छ्रायैः शृङ्गोन्नत्यैः खं आकाशं वितत्य स्थितः किंविशिष्टैः शृङ्गो

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान् हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रं तेनोदीचीं दिशमनुसरेस्तिर्य
गायामशोभी श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ६० गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः कै
लासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं राशीभूतः प्रतिदिशमि
व त्र्यंबकस्याट्टहासः ६१ उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य शोभामद्रेः
स्तिमितनयनप्रेक्षणीयां भवित्रीम् अंसन्यस्ते सति हलभृतो मेचके वाससीव ६२ ॥

च्छ्रायैः कुमुदविशदैः कुमुदवत् विशदाः उ
ज्ज्वलाः कुमुदविशदास्तैः कैलासः कइव त्र्यंबकस्य महेशस्य प्रतिदिशं राशीभूतः अट्टहास इव ६१ उत्पश्यामीति भो जलद तस्य कैलासस्य त्वयि तटग
ते सति अहं भवित्रीं शोभां उत्पश्यामि किंविशिष्टस्य सद्यःकृत्तद्विरददशनच्छेदगौरस्य सद्यः तत्कालं कृत्ताः छेदिताः ये द्विरददशनाः गजदन्ताः तेषां यः
छेदः तद्वत् गौरः सद्यःकृत्तद्विरददशनच्छेदगौरस्तस्य किंविशिष्टे त्वयि स्निग्धभिन्नाञ्जनाभे स्निग्धं च भिन्नं विदीर्णं यत् अञ्जनं कज्जलं तद्वत् आभा यस्य स
तस्मिन् किंविशिष्टां शोभां अद्रेः पर्वतस्य स्तिमितनयनप्रेक्षणीयां स्तिमितैर्निश्चलैर्नयनैर्नेत्रैः प्रेक्षणीया यादृशी याः स्तिमितनयनप्रेक्षणीया तां तस्य क

२०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तस्मिन्निति भो पयोद तस्मिन् क्रीडाशैले कैलाशे गौरी पार्वती यदि चेत् पादचारेण विचरेत् किं कृत्वा भुजगवलयं शम्भुना भुजगवलयं हित्वा त्यक्त्वा किं विशिष्टा गौरी दत्तो न महेशेन दत्तहस्तावलंबा भो जलद तत् तदा त्वं सोपानत्वं कुरु किं विशिष्टस्त्वं भंगीभक्त्या तिन्नरपक्षविसृत्या विरचितवपुः रचितशरीरः पुनः किं विशिष्टस्त्वं स्तंभितान्तर्जलौघः स्तंभितः अंतर्मध्ये जलौघो जलसमूहो येन सः पुनः किं विशिष्टस्त्वं मणितटारोहणाय अग्रयायी अग्रगामी मणितटारोहणाय अग्रयायी अग्रगामी मणितटस्य यत् आरोहणं मणितटारोहणं तस्मै ६३ तत्रावश्यमिति भो पयोद तस्मिन् कैलाशे अवश्यं निश्चितं सुरयुवत

तस्मिन् हित्वा भुजगवलयं शंभुना दत्तहस्ता क्रीडाशैले यदि च विचरेत्पादचारेण गौरी भंगीभक्त्या विरचितव
पुः स्तंभितान्तर्जलौघः सोपानत्वं कुरु मणितटारोहणायाग्रयायी ६३ तत्रावश्यं कुलिशवलयोद्घट्टनोद्गीर्णतो
यं नेष्यन्ति त्वां सुरयुवतयो यंत्रधारागृहत्वं ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात् क्रीडालोलाः श्रवणप
रुषैर्गर्जितैर्भापयेस्ताः ६४ ॥

यः देवांगनाः त्वां यंत्रधारागृहत्वं नेष्यन्ति किं विशिष्टं त्वां कुलिशवलयोद्घट्टनेनोद्गीर्णतोयं कुलिशवलयस्य विद्युद्वलयस्य उद्घट्टनेन भ्रमणेन उद्गीर्णं उत्पन्नं तोयं पानीयं यस्मिन् सः तं भो सखे ताभ्यः देवीभ्यः यदि तव मोक्षः न स्यात् न भवेत् किं विशिष्टस्य तव घर्मलब्धस्य ग्रीष्मप्राप्तस्य तदा ताः देवांगनाः श्रवणपरुषैः कर्णकठोरैः गर्जितैः भापयेः भीषयेः किं विशिष्टाः ताः क्रीडालोलाः विहारे चंचलाः ६४ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे० टी हेमांभोज्ञ इति भो पयोद त्वं नगेन्द्रं कैलाशं पर्वतं निर्विघ्नः उपभुंक्ष्व किं विशिष्टं नगेंद्रं स्फुटिकविशदं स्फटिकोज्ज्वलं किं विशिष्टस्त्वं छायाभिन्नः छाय
२१ याकांत्या भेदितः छायाभिन्नः किं कुर्वन् त्वं मानसस्य मानससरोवरस्य सलिलं पानीयं आददानः गृह्णन् पुनः किं कुर्वन् कामं अत्यर्थं ऐरावणस्य ऐरा-
वणगजेन्द्रस्य क्षणं मुखपटप्रीतिं कुर्वन् क्षणमात्रं मुखपटप्रीतिः तां पुनः किं कुर्वन् त्वं कल्पवृक्षांशुकानि कल्पवृक्षवस्त्राणि सजलपृषतैः जलकणैः
सह वर्त्तन्ते ये ते सजलपृषताः तैः सः ६५ तस्योत्संग इति भो कामचारिन् त्वं तस्य कैलाशस्य उत्संगे अलकां दृष्ट्वा न न ज्ञास्यसे अपि तु ज्ञास्यसे किं

हेमांभोजप्रसवि सलिलं मानसस्याददानः कुर्वन्कामं क्षणमुखपटप्रीतिमैरावणस्य धुन्वन्वातैः सजलपृषतैः कल्पवृ-
क्षांशुकानि छायाभिन्नः स्फटिकविशदं निर्विशेस्तं नगेन्द्रं ६५ तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां न त्वं दृ-
ष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् या वः काले वहति सलिलोद्गारमुच्चैर्विमानैः मुक्ताजालग्रथितमलकं कामिनी
वाभ्रवृंदं ६६

विशिष्टां अलकां स्रस्तगंगादुकूलां स्रस्तं पतितं गंगैव दुकूलं पट्टवस्त्रं यस्याः सा तां तस्य कस्येव प्रणयिन इत्यादि भर्त्तुरिव यथा
भर्त्तुरुत्संगे स्रस्तदुकूला स्त्री भवति भो पयोद या अलका वो युष्माकं काले वर्षाकाले उच्चैर्विमानैः अभ्रवृंदं वहति किं विशिष्टं अभ्रवृंदं सलि-
लोद्गारं सलिलानां उद्गारो यत्र तत् अलकाकेव कामिनीव अभ्रवृंदं किमिव अलकमिव यथा कामिनी मुक्ताजालग्रथितं अलकं सोच्चयं वहति २१
६६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पत्रश्यामेति भो जलद यत्र अलकायां वाहाः अश्वाः पत्रश्यामा वर्ण्यन्ते पत्रवत् बालतृणवत् श्यामाः नीलाः पत्रश्यामाः किंविशिष्टाः वाहाः दिनकरहयस्पर्द्धिनः दिनकरहयैः सूर्याश्वैः स्पर्द्धन्ते इत्येवं शीलं येषां ते दिनकरहयस्पर्द्धिनः भो जलद यत्र अलकायां करिणो गजाः प्रभेदात् प्राक्स्फोटात् त्वमिव वृष्टिमन्तः वर्षिणः वर्ण्यन्ते किंविशिष्टाः करिणः शैलोदग्राः शैलवत् पर्वतवत् उदग्रा उत्कटाः शैलोदग्राः भो पयोद यत्र अलकायां योधाग्रण्यः प्रतिदशमुखं दशमुखं प्रति रावणं प्रति संयुगे तस्थिवांसः स्थिताः सन्तः वर्ण्यन्ते किंविशिष्टाः योधाग्रण्यः चन्द्रहासव्रणाङ्कैः चन्द्रहासव्रण-

पत्रश्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् योधाग्रण्यः प्रतिदशमुखं
संयुगे तस्थिवांसः प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ६७ विद्युत्वन्तं ललितवनिताः सेन्द्रचापं विचित्राः संगी-
ताय प्रहतमुरजाः स्निग्धगम्भीरघोषं अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्वि-
शेषैः ६८ ॥

चिह्नैः प्रत्यादिष्टाभरणरुचयः प्रत्यादिष्टा तिरस्कृता आभरणरुचिः आभरणकान्तिर्येषां ते प्रत्यादिष्टाभरणरुचयः ६७ विद्युत्वन्तमिति भो जलद यत्र अलकायां प्रासादाः तैस्तैर्विशेषैः त्वां तुलयितुं अलं समर्थाः भविष्यन्ति किंविशिष्टं त्वां विद्युत्वन्तं तं वनादस्यदासे डिद्युक्तं किंविशिष्टाः प्रासादाः ललितवनिताः मनोहरस्त्रीसहिताः किंविशिष्टं त्वां सेन्द्रचापं इन्द्रधनुःसहितं किंविशिष्टाः प्रासादाः संगीताय संगीतार्थं प्रहतमुरजाः वादितमृदङ्गाः किंविशिष्टं त्वां अन्तस्तोयं अन्तः मध्ये तोयं पानीयं यस्य सः तं किंविशिष्टाः प्रासादाः मणिमयभुवः मणिमया भुवो येषां ते पुनः किंविशिष्टं त्वां तुङ्गं उच्चैस्तरं

किंविशिष्टाः प्रासादाः अभ्रंलिहाग्राः आकाशप्राप्यानि अग्राणि येषां ते ६८

आनंदोत्थमिति भो जलद यत्रालकायां नगर्य्यां वित्तेशानां नयनसलिलं नेत्राम्बु आनंदोत्थं अन्यैर्मरणादिनिमित्तैः विप्रोषैर्न भो पयोद यत्र यस्यां नग
र्य्यां वित्तेशानां तापः कुसुमशरजात् कंदर्पबाणजात् अन्यो न किंविशिष्टस्तापः इष्टसंयोगसाध्यः इष्टसंयोगेन साध्यः भो बलाहक यत्र यस्यां नगर्य्यां वि
त्तेशानां प्रणयकलहात् स्नेहकलहात् अन्यो विप्रयोगो वियोगो न अन्यादि विरहयुक्तिर्न च पुनः भो पयोद खलु निश्चितं यत्र यस्यां नगर्य्यां वित्तेशानां य
क्षाणां यौवनात् अन्यत् बाल्यवृद्धादिकं वयो नास्ति ६८ हस्ते लीलाकमलमिति भो पयोद यत्रालकायां वधूनां स्त्रीणां करे लीलाकमलं वर्त्तते भो ज

आनंदोत्थं नयनसलिलं यत्र नान्यैर्निमित्तैर्नान्यस्तापः कुसुमसरजादिष्टसंयोगसाध्यः नान्या यत्र प्रणयकलहाद्विप्रयोगोप
पत्तिर्वित्तेशानां न खलु च वयो यौवनादन्यदस्ति ६९ हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं नीता लोध्रप्रसवरजसा पां
डुतामाननश्रीः चूडापाशे नवकुरवकं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ७० ॥ १ ॥

लद यत्रालकायां वधूनां अलकं कुटिलकेशं बालकुन्दानुविद्धं वर्त्तते बालकुन्दैरनुविद्धं ग्रथितं बालकुन्दानुविद्धं भो जलद यत्रालकायां वधूनां आ
ननश्रीर्मुखश्रीः लोध्रप्रसवरजसा पांडुतां उज्वलतां नीता प्रापिता लोध्रस्य प्रसवः कुसुमं तस्य रजः किंजल्कं लोध्रप्रसवरजः तेन भो पयोद यत्र नगर्य्यां वधू
नां चूडापाशे वेणीदण्डे नवकुरवकं नवकुरवककुसुमं वर्त्तते भो जलद यत्र नगर्य्यां कर्णे चारु मनोज्ञं शिरीषं कुसुमं शिरीषं वर्त्तते भो जलद यत्र अल
कायां वधूनां सीमन्ते अलकमध्ये नीपं कदम्बकुसुमं वर्त्तते किंविशिष्टं नीपं त्वदुपगमजं त्वदुपगमात् त्वदागमनात् जातं त्वदुपगमजं ७० ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

यस्यांपक्षा इति भो जलद यस्यां अलकायां याः यक्षाः मधुमद्यं आसेवंते पिबंति किं कृत्वा सितमणिमयानि हर्म्यस्थलानि गृहांगणानि पत्य आगत्य किं
विशिष्टाः यक्षाः उत्तमस्त्रीसहायाः उत्तमस्त्रीसहिताः किं विशिष्टानि हर्म्यस्थलानि ज्योतिच्छायाकुसुमरचनानि ज्योतिर्षां छाया प्रतिबिंबं से
व कुसुमरचना तेषु तत्र किं विशिष्टं मधु रतिफलं सुरतफलं पुनः किं विशिष्टं मधु कल्पवृक्षप्रसूतं कल्पवृक्षोत्पन्नं केषु सत्सु पुष्करेषु मृदंगेषु
आहतेषु सत्सु वाद्यतेषु सत्सु किं विशिष्टेषु पुष्करेषु त्वद्गंभीरध्वनिषु त्वद्वत् गंभीरो ध्वनिर्येषां ये त्वद्गंभीरध्वनयः तेषु कथं यथा भवति तथा

यस्यांपक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि ज्योतिश्छायाकुसुमरचनान्युत्तमस्त्रीसहायाः आसेवंते मधु रतिफलं
कल्पवृक्षप्रसूतं त्वद्गंभीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ७१ मंदाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिः मन्दा
राणामनुतटरुहां छायया वारितोष्णाः अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः संक्रीडंते मणिभिरमरप्रार्थिता यत्र
कन्याः ७२

शनकैर्मंदं यथा भवति तथा ७१ मंदाकिन्या इति भो जलद यत्र अलकायां कन्या मणिभिः संक्रीडंते रमंते किं विशिष्टाः कन्याः अमरप्रार्थिताः अमरै
र्देवैः प्रार्थिता अमरप्रार्थिताः पुनः किं विशिष्टाः कन्याः मंदाकिन्याः मरुद्भिर्वातैः सेव्यमानाः किं विशिष्टैः मरुद्भिः सलिलशिशिरैः पानीयशीतलैः पु
नः किं विशिष्टाः कन्याः मंदाराणां कल्पद्रुमाणां छायया वारितोष्णाः निषिद्धातपाः किं विशिष्टानां मंदाराणां अनुतटरुहां किं विशिष्टैः मणिभिः
कनकसिकतामुष्टिनिक्षेपगूढैः कनकसिकतासु स्वर्णवालुकासु ये मुष्टिनिक्षेपाः तैर्गूढाः कनकसिकतामुष्टिनिक्षेपगूढास्तैः पुनः किं विशि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे॰टी॰ नीवीबंधइति भोजलदयत्रालकायांयक्षांगनानांयस्याह्रीणांप्रेरितश्चूर्णमुष्टिःविफलाभवतिकिंकुर्वन् अर्चिस्तुंगानरत्नप्रदीपान् अभिमुखमपिसन्मुख
२३ मपिप्राप्यलब्ध्वाकिंविशिष्टानांयक्षांगनानांह्रीमूढानांकेषुसत्सुप्रियेषुभर्तृषुरागात्स्नेहात्क्षौमंदुकूलंआक्षिपत्सुसत्सुकिंविशिष्टेषुप्रियेषुअ
निभृतकरेषुचंचलकरेषुकिंविशिष्टंदुकूलंनीवीबंधोच्छ्वसितशिथिलंनीवीबंधात्उच्छ्वसितंचतत्शिथिलंचनीवीबंधोच्छ्वसितशिथिलं ७३ य
त्रोन्मत्तइति भोपयोदयत्रालकायांपादपाःनित्यपुष्पाःवर्त्तंतेकिंविशिष्टाःपादपाःउन्मत्तैर्मत्तैर्भ्रमरैर्मुखराःवाचालाःउन्मत्तभ्रमरमुखराःभोपयोदयत्रा

नीवीबंधोच्छ्वसितशिथिलंयत्रयक्षांगनानांक्षौमंरागादनिभृतकरेष्वाक्षिपत्सुप्रियेषु अर्चिस्तुंगानभिमुखमपिप्राप्य
रत्नप्रदीपान् ह्रीमूढानांभवतिविफलाप्रेरितश्चूर्णमुष्टिः ७३ यत्रोन्मत्तभ्रमरमुखराःपादपानित्यपुष्पाहंसश्रेणीर
चितरसनानित्यपद्मानलिन्यः केकोत्कंठाभवनशिखिनोनित्यभास्वत्कलापाः नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याःप्रदो
षाः ७४

लकायांनलिन्यःकमलिन्यःनित्यपद्माःनित्यकमलाःकिंविशिष्टाःनलिन्यःहंसश्रेणीरचितरसनाःहंसश्रेणीभिःरचितारसनाकांचिमेखला
याभिस्ताःभोजलदयत्रनगर्यांभवनशिखिनोनित्यभास्वत्कलापाःनित्यंभास्वंतःदेदीप्यमानाःकलापाःपुच्छायेषांतेकिंविशिष्टाभवनशिखिनः
केकोत्कंठाःकेकायांनिजवाण्यांउत्कंठायेषांतेभोपयोदयत्रनगर्यांप्रदोषाःनित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याःनित्यज्योत्स्नाभिःनित्यचंद्रच
कांतिभिःप्रतिहतातिरस्कृतातमोवृत्तिःअंधकारव्यापारःतयारम्याःमनोहराःनित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः ७४ ॥ ॥ ॥ २३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

गत्युत्कंपादिति भो जलद यत्रालकायां कामिनीनां नारीणां नैशो मार्गः सवितुः सूर्य्यस्य उदये सूच्यते तर्क्यते कैः गत्युत्कंपात् गमनोत्कंपात् अलकपति
तैः कनककमलैः कर्णकमलैः किंविशिष्टैः कनककमलैः पत्राः च्छेद्यैः पत्रछेदनयोग्यैः पुनः कैः हारैः किंविशिष्टैः हारैः मुक्तालग्नस्तनपरिमल
छिन्नसूत्रैः मुक्तालग्नस्तनपरिमलेन मर्द्दनेन छिन्नसूत्राः मुक्तालग्नस्तनपरिमलेछिन्नसूत्राःते ७५ नेत्रा नीता इति भो जलद पत्रालकायां
जालैः धूमोद्गारान्निष्पतंतीति निर्गच्छंति किंविशिष्टाः धूमोद्गाराः नेत्राप्रापकेन सततगतिनापवनेन यद्विमानाग्रभूमीरानीताः प्राप्ताः यस्याः अल
कायाः विमानाग्राभूम्यः यद्विमानाग्रभूम्यः ताः पुनः किंविशिष्टाः धूमोद्गाराः आलेख्यानां सलिलकणिकादोषं वाष्पजलदोषं सद्यः तत्काल उत्पा

गत्युत्कंपादलकपतितैर्यत्र मंदारपुष्पैः पत्रच्छेद्यैः कनककमलैः कर्णविस्रंसिभिश्च मुक्तालग्नस्तनपरिमलछिन्नसूत्रै
श्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनां ७५ नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी रालेख्यानां सलिल
कणिकादोषमुत्पाद्य सद्यः शंकास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालैः धूमोद्गारानुकृतिनिपुणा जर्जरा निःपतंति ७६

य शंकास्पृष्टा इव शंकिता इव सलिलकणिकेव वाष्पकणिकेव दोषः सलिलकणिकादोषस्तं पुनः किंविशिष्टाः धूमोद्गाराः जलमुचः जलं मुंचंती
ति जलमुचः पुनः किंविशिष्टाः धूमोद्गाराः सदृशाः त्वत्सदृशाः मेघसदृशाः इत्यर्थः पुनः किंविशिष्टाः धूमोद्गाराः निकृतिनिपुणाः निकृतिस्ति
रस्कारः तत्र निपुणाः अत एव जर्जराः ७६ यत्रे ति भो वलाहक यत्र यस्यां नगर्य्यां स्त्रीणां सुरतजनितां संभोगोत्पन्नां अंगग्लानिं शरीरखेदं चंद्र
कांताः व्यालेपनंतितिरस्कुर्वंति किंविशिष्टानां स्त्रीणां प्रियतमभुजालिंगनोच्छ्वासितानां प्रियतमानां भुजालिंगनं तेन उच्छ्वासिता ऊढ्वा प्रकाशी कृताः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

प्रियतमभुजालिंगनोच्छ्वासितास्तासां प्रियतमभुजालिंगनोच्छ्वासितानां किंविशिष्टाश्चंद्रकांताः पत्रजालावलंबाः पत्रजालेषु पत्रगवाक्षेषु अवलंबंते इत्येवंशीलाः पत्रजालावलंबाः पुनः किंविशिष्टाश्चंद्रकांताः स्फुटजललवस्यंदिनः स्फुटान् जललवान् जलबिंदून् स्यंदंति स्रवंति इत्येवंशीलाः स्फुटजललवस्यंदिनः पुनः किंविशिष्टाः चंद्रकांताः चंद्रपादैः चंद्रकिरणैः प्रेरिताः किंविशिष्टैः चंद्रपादैः त्वत्संरोधोपगमविशदैः त्वदीयो यः संरोधः वर्षालक्षणः तस्य अपगमो विनाशः प्रावृट्काललक्षणः तस्मात् विशदाः उज्ज्वलाः त्वत्संरोधोपगमविशदास्तैः

पत्रक्षीणां प्रियतमभुजालिंगनोच्छ्वासितानां मंगग्लानिं सुरतजनितां पत्रजालावलम्बाः त्वत्संरो
धोपगमविशदैः प्रेरिताश्चंद्रपादैः व्यालुंपंति स्फुटजललवस्यंदिनश्चंद्रकांताः ७७ अक्षीणांत
र्भवननिधयः प्रत्यहं रक्तकंठैः रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धं वैभ्राजाख्यं विबुधवनिता
वारमुख्याः सहायाः बद्धापानं बहिरुपवनं कामिनो निर्विशंति ७८ ॥

७७ अक्षीणांतरिति भो पयोद यत्रालकायां कामिनः प्रत्यहं निरंतरं वैभ्राजाख्यं वैभ्राजनामकं बहिरुपवनं बाह्योद्याने निर्विशंति उपभुंजंति किंविशिष्टाः कामिनः अक्षीणांतर्भवननिधयः अक्षीणाः अंतर्भवनं गृहमध्ये निधयो येषां ते पुनः किंविशिष्टाः कामिनः विबुधवनितावारमुख्याः सहायाः विबुधवनिता देवांगनाः वारमुख्याः वारांगणाः ता एव सहाया येषां ते किंविशिष्टं उपवनं बद्धापानं रचितमद्यगोष्ठीकं कैः सार्द्धं किन्नरैः सार्द्धम् किंविशिष्टैः किन्नरैः धनपतियशः धनदयशः उद्गायद्भिः गायमानैः पुनः किंविशिष्टैः किन्नरैः रक्तकंठैः मधुरकंठैः ७८ ॥ ० ० ० ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मत्वा देवमिति भो जलद यत्र यस्यां नगर्यां मन्मथः कंदर्पः प्रायो बाहुल्येन चापं धनुः न वहति कस्मात् भयात् किं कृत्वा देवं महेशं साक्षाद्वसंतं मत्वा
ज्ञात्वा किंविशिष्टं देवं धनपतिसखं किंविशिष्टं चापं षट्पदज्यं भ्रमरप्रत्यंचं भो मेघ तस्य मन्मथस्य आरंभस्त्रिभुवनविजयलक्षणः चतुरवनिता-
विभ्रमैरेव चतुरस्त्रीविलासैरेव सिद्धः निष्पन्नः किंविशिष्टैः विभ्रमैः सभ्रूभंगं यथा स्यादेवं तथा प्रहितनयनैः प्रेषितनेत्रैः पुनः किंविशिष्टैः
विभ्रमैः कामिलक्ष्येषु कामिदेहेषु अमोघैः सफलैः ७९ वासश्चित्रमिति भो जलद यस्यां नगर्याम् एकः कल्पवृक्षः सकलं अबलामंडनं
सूते जनयति किं तदित्याह चित्रं मनोहरं वस्त्रं सूते पुनः मधु मद्यं किंविशिष्टं मधु नयनयोर्नेत्रयोर्विभ्रमादेशदक्षं विभ्रमो विला-

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसंतं प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यं सभ्रूभंगप्रहितनयनैः कामिलक्ष्येष्वमो-
घैः तस्यारंभश्चतुरवनिताविभ्रमैरेव सिद्धः ७९ वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं पुष्पोद्भेदं सह किसलयैर्भू-
षणानां विकल्पान् लाक्षारागं चरणकमलन्यासयोग्यं च यस्यामेकः सूते सकलमबलामंडनं कल्पवृक्षः ८० ॥ ॥

सस्तस्य आदेशं लक्षयतीति विभ्रमादेशदक्षं तत् पुनः किं सूते किसलयैः सह पुष्पोद्भेदं कुसुमोद्भेदं सूते पुनः किं सूते भूषणानां मंडनानां विकल्पा-
न् विशेषान् पुनः किं सूते लाक्षारागं सूते लाक्षारागं यावकमित्यर्थः किंविशिष्टं लाक्षारागं चरणन्यासयोग्यं ८० तत्रागारमिति भो पयोद तत्र तस्यां
नगर्याम् अस्मदीयं आगारं गृहं धनपतिगृहात् कुबेरगृहादुत्तरेण उत्तरदिग्भागे वर्तते किंविशिष्टं आगारं तोरणेन दूरात् लक्ष्यं किंविशिष्टेन तोरणेन सुरपति-
धनुश्चारुणा इंद्रधनुर्मनोहरेण भो जलद यस्य आगारस्य उपांते समीपे मम कांतया बालमंदारवृक्षः वर्द्धितः किंविशिष्टः बालमंदारवृक्षः हस्तप्राप्य-

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

प्यस्तवकविनतः हस्तप्राप्यैः हस्तग्राह्यैः स्तवकैः पुष्पगुच्छैः विनतः नम्रीभूतः हस्तप्राप्यस्तवकविनतः पुनः किंविशिष्टः बालमन्दारवृक्षः कृतककृतनयः कृत्रि
मपुत्रः ८१ वापी चेति भो जलद च पुनः अस्मिन् आगारे वापी वर्त्तते किंविशिष्टा वापी मरकतशिलाबद्धसोपानमार्गा पुनः किंविशिष्टा वापी हैमैः सौव
र्णैः विकचकमलैः छन्ना आच्छादिता किंविशिष्टैः विकचकमलैः दीर्घवैदूर्यनालैः दीर्घा वैदूर्यस्य नालाः येषां तानि दीर्घवैदूर्यनालानि तैः दीर्घवैदूर्यना
लैः भो जलद तस्याः वाप्याः तोये पानीये कृतवसतयो हंसाः मानससरो विशिष्टं सन्निकृष्टमपि समीपमपि न ध्यास्यन्ति न चिन्तयिष्यन्ति किं कृत्वा त्वां प्रेक्ष्य द

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन यस्योपान्ते कृतककृतनयः कान्तया वर्द्धितो
मे हस्तप्राप्यस्तवकविनतो बालमन्दारवृक्षः ८१ वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा हैमैश्छन्ना विकचकमलैः दीर्घवै
दूर्यनालैः यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं नध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ८२ तस्यास्तीरे रचितशि
खरः पेशलैरिन्द्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण प्रेक्ष्योपान्त
स्फुरिततडितं त्वां तमेव स्मरामि ८३ ॥ ट्वा किंविशिष्टाः हंसाः व्यपगतशुचः गतशोकाः ८२ तस्यास्तीर इति भो पयोद तस्याः वाप्यास्तीरे स
मीपे क्रीडाशैलः क्रीडापर्वतः वर्त्तते किंविशिष्टः क्रीडाशैलः पेशलैः मनोहरैः इन्द्रनीलैः मरकतमणिभिः रचितशिखरः पुनः किंविशिष्टः क्रीडाशैलः
कनककदलीवेष्टनप्रेक्षणीयः कनककदल्याः स्वर्णकदल्याः पद्वेष्टनं परिवेषस्तेन प्रेक्षणीयः दर्शनीयः कनककदलीवेष्टनप्रेक्षणीयः भो सखे त
हं इति हेतोस्तमेव स्मरामि इतीति किं मद्गेहिन्याः प्रियः अभीष्टः केन कातरेण चेतसा किं कृत्वा उपान्तस्फुरिततडितं त्वां संप्रेक्ष्य दृष्ट्वा उपान्ते समीपे स्फुरि
ता तडित् विद्युत् यस्य स उपान्तस्फुरिततडित्तम् ८३

रक्ताशोक इति । भो पयोद अत्र गृहे रक्ताशोको वर्त्तते किंविशिष्टः रक्ताशोकः चलकिसलयः च पुनः केशरो वर्त्तते किंविशिष्टः केशरः कान्तः मनोज्ञः पुनः किंवि
शिष्टः केशरः माधवीमंडपस्य प्रत्यासन्नः निकटवर्त्ती माधवीलताविशेषः तस्याः मंडपः माधवीमंडपः तस्य किंविशिष्टस्य माधवीमंडपस्य कुरुवकवृत्तेः
कुरुवकवृक्षविशेषस्य वृत्तिर्वेष्टनं यस्य सः कुरुवकवृत्तिस्तस्य भो जलद एकः रक्ताशोकः मया सह तव सख्याः मद्भार्यायाः वामपादाभिलाषी वर्त्तते पादा
हतः प्रमदया विकसत्यशोक इति वचनात् । भो पयोद अन्यो वकुलः अस्याः मद्भार्यायाः दोहदछद्मना दोहदकपटेन वदनमदिरां मुखसुरां कांक्ष

रक्ताशोकश्चलकिसलयः केशरश्चात्र कान्तः प्रत्यासन्नः कुरुवकवृत्तेर्माधवीमंडपस्य । एकः सख्यास्तव सह मया वामपादा
भिलाषी कांक्षत्यन्यो वदनमदिरां दोहदछद्मनास्याः ॥ ८४ ॥ तन्मध्ये च स्फटिकफलका कांचनी वासयष्टिः मूले बद्धा मणि
भिरनतिप्रौढवंशप्रकाशैः । तालैः शिंजद्वलयसुभगैः कान्तया नर्त्तितो मे यामध्यास्ते दिवसविगमे नीलकंठः सुहृद्वः ॥ ८५ ॥

ति । अभिलषति शोकं जहातीति वकुलो मधुशीधुसिक्तः इति वचनात् ॥ ८४ ॥ तन्मध्ये चेति । भो जलद तन्मध्ये गृहाराममध्ये कांचनी वासयष्टिः वर्त्तते पक्षि
णां वासार्थं यष्टिः वासयष्टिः किंविशिष्टा वासयष्टिः स्फटिकफलका स्फटिकस्य फलकं यस्यां सा पुनः किंविशिष्टा वासयष्टिः मूले मणिभिर्बद्धा किंवि
शिष्टैर्मणिभिः अनतिप्रौढवंशप्रकाशैः अनतिप्रौढाः कोमलाः ये वंशाः तद्वत्प्रकाशो येषां ते अनतिप्रौढवंशप्रकाशास्तैः भो मेघ वो युष्माकं सुहृत् मित्रं नी
लकंठो मयूरो दिवसविगमे यां यष्टिं अध्यास्ते किंविशिष्टो नीलकंठः मे मम कान्तया मद्भार्यया तालैर्नर्त्तितः किंविशिष्टैस्तालैः शिंजद्वलयसुभगैः शिंजतः शब्दायमानाः ये वलयास्तैः सुभगाः शिंजद्वलयसुभगास्तैः ॥ ८५ ॥

श्रीः २ ५

एभिरिति भो साधो भो मेघ एभिः पूर्वोक्तलक्षणैः त्वं लक्षयेथाः ज्ञानीयाः किंविशिष्टैः लक्षणैः हृदयनिहितैः हृदयस्थापितैः किंकृत्वा च पुनः द्वारोपा
न्ते द्वारसमीपे लिखितवपुषौ शंखपद्मौ दृष्ट्वा भो पयोद नूनं निश्चितं अधुना भवनं गृहं मद्वियोगेन मद्विरहेण क्षामछायं पवर्त्तेते युक्तोयमर्थः ख
लु निश्चितं कमलं सूर्यापाये सूर्यविनाशे स्वां आत्मीयां अभिख्यां शोभां न पुष्यति ॥८६॥ गत्वा सद्य इति भो जलद त्वं अन्तर्भवनपतितां आगारमध्य
वर्त्तिनीं विद्युदुन्मेषदृष्टिं कर्त्तुं अर्हसि योग्यो भवसि विद्युदुन्मेष एव दृष्टिः विद्युदुन्मेषदृष्टिः तां किंविशिष्टां विद्युन्मेषदृष्टिं खद्योतालीविलसित

राभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथाः द्वारोपान्ते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा क्षामच्छायं भवनमधुना मद्वि-
योगेन नूनं सूर्यापायेन खलु कमलं पुष्यति स्वामभिख्यां ॥८६॥ गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः क्रीडाशैले प्रथमकथि
ते रम्यसानौ निषण्णः अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥८७॥ ॥ ॥

निभां खद्योताली खद्योतश्रेणी तस्याः यद्विलसितं विलासः सन्निभा तत्सदृशी खद्योतालीविलसितनिभा तां पुनः किंविशिष्टां विद्युदुन्मेषदृष्टिं अल्पाल्पभासं
लोकस्तोककांतिं किंविशिष्टस्त्वं प्रथमकथिते क्रीडाशैले निषण्णः उपविष्टः किंकृत्वा शीघ्रसंपातहेतोः कलभतनुतां सद्यस्तत्कालेन गत्वा कलभः करिणः को
गजः तत्तनुता सूक्ष्मता कलभतनुता तां किंविशिष्टे क्रीडाशैले रम्यसानौ मनोहरशृंगे ॥८७॥ ॥ ५ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अप्रसूता भवेच्छ्यामा श्यामा चैषललनौषधिः शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला सर्वदा सुकुमाराङ्गी श्यामा सा परिकीर्तिता पक्वदाडिमवीजाभं
माणिक्यं शिखरं विदुः विम्बः शिखरो नः पद्मरागमणयः इव दशना दन्ताः यस्याः सा तन्वीइति भो जलद तत्र गृहमध्ये या स्त्री स्यात् सा युवतिविषये ।
स्त्रीविषये धातुर्ब्रह्मणः आद्येव सृष्टिः किंविशिष्टा या तन्वी सुकुमाराङ्गी पुनः किंविशिष्टा या श्यामा श्यामा मता अप्रसूता षोडशवार्षिकी मधुरभाषिणी
पुनः किंविशिष्टा या शिखरदशना पक्वदाडिमवीजाभं माणिक्यं शिखरं विदुः तद्वद्दशना दन्ताः यस्याः सा पुनः किंविशिष्टा या पक्वविम्बाधरोष्ठी पक्वविम्व

तन्वी श्यामा शिखरदशना पक्वविम्बाधरोष्ठी मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः श्रोणीभारादलसगमना
स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ८२ तां जानीयाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते म
यि सहचरे चक्रवाकीमिवैकां गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये तुहिनमथितां पद्मिनीं वान्यरूपां ८३

वत् अधरोष्ठो यस्याः सा पुनः किंविशिष्टा या चकितहरिणीप्रेक्षणा चकितहरिणीवत् प्रेक्षणं अवलोकनं यस्याः सा पुनः किंविशिष्टा या निम्ननाभिः
पुनः किंविशिष्टा या श्रोणीभारात् अलसगमना मन्दगामिना पुनः किंविशिष्टा या स्तनाभ्यां स्तोकनम्रा किंचिन्नता ८२ युग्मं तां जानीयाः इति भो पयोद ।
तां स्त्रीं मे मम द्वितीयं जीवितं जानीयाः किंविशिष्टां तां परिमितकथां स्तोकवाचं पुनः किंविशिष्टां तां मयि सहचरे दूरीभूते सति एकां चक्रवाकीमिव पुनः किं
विशिष्टां तां एषु गुरुषु दिवसेषु गरिष्ठदिवसेषु गाढोत्कण्ठां गाढोत्सुका पुनः किंविशिष्टां तां बालां भो जलद तुहिनमथितां हिमक्लिष्टां पद्मिनीं कमलि

मे·टी· नूनमिति भो जलद नूनं निश्चितं तस्याः प्रियायाः मुखं इंदोर्दैन्यं दैन्यं विभर्त्ति धारयति किं विशिष्टं मुखं हस्तन्यस्तं हस्तस्थापितं पुनः किं विशिष्टं मुखं निः
२७ श्वासानां अशिशिरतया भिन्नवर्णाधरोष्ठं भिन्नवर्णो भेदितवर्णो अधरोष्ठो यस्य तत् पुनः किं विशिष्टं मुखं प्रबलरुदितोच्छूननेत्रं प्रबलरुदितेन उच्छू
ननेत्रं वर्द्धमाननेत्रं यस्य तत् पुनः किं विशिष्टं मुखं लंबालकत्वात् लंबकेशत्वात् असकलव्यक्ति किं विशिष्टस्य इंदोः त्वदनुसरणक्लिष्टकांतेः त्वदनुसर
णेन मेघानुवर्त्या क्लिष्टा कांतिर्यस्य सः त्वदनुसरणक्लिष्टकान्तिः तस्य ८० आलोके ते इति भो पयोद प्राप्तविने तव पुरा पश्चात् आलोके निप

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठं हस्तन्यस्तं मुखमसकलव्यक्ति
लंबालकत्वादिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ८० आलोके ते निपतति पुरा सा बलिव्याकुला वा मत्सादृश्यं
विरहतनु वा भावगम्यं लिखन्ती पृच्छन्ती वा मधुरवचनां सारिकां पंजरस्थां कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति
८१

ततिपतिष्यतीत्यर्थः किं विशिष्टा सा बलिव्याकुला बलपेपूजार्थी व्याकुला बलिव्याकुला पुनः किं विशिष्टा सा मपि भावगम्यं चित्रा भिप्रायेण ज्ञेयं मत्सादृश्यं
लिखंती पुनः किं विशिष्टा सा विरहतनुका विरहदुर्वला पुनः किं विशिष्टा सा पंजरस्थां सारिकां इति पृच्छंती [illegible]तीति किं हि निश्चितं हे रसिके कच्चिदिष्ट प्र
पूते त्वं भर्तुः स्मरति तस्य प्रिया किं विशिष्टां सारिकां मधुरवचनां मधुरभाषिणीम् ८१ ॥ ५ ५ ५ ५ ॥ २७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शेषानिति पुनः किं कुर्वंती सा भुवि पृथिव्यां गणनया देहलीमुक्तपुष्पैः शेषान् मासान् विन्यस्यंती स्थापयिष्यंती वा निश्चिये विरहदिवसस्थापितस्य अव-
धेः पुनः किं विशिष्टा या हृदयनिहितारंभं मत्संयोगं आस्वादयंती युक्तोपमर्थेः अंगनानां नारीणां प्रायेण बाहुल्येन रमणविरहे भर्तृविरहेषु एते वि-
नोदाः भवंति ९२ कुलकं सव्यापारामिति भोः पयोद अहं एवं शंके मद्वियोगः तेन वसंती मद्भार्य्यां अहनि दिवसे तथा न पीडयेत् यथा रात्रौ किं विशिष्टां
सखीं अहनि सव्यापारां व्यापारसहितां रात्रौ किं विशिष्टां सखीं गुरुतरशुचं बहुशोकं रात्रौ पुनः किं विशिष्टां सखीं निर्विनोदां विनोदवर्जितां भो जलद निशी-

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा विन्यस्यंती भुवि गणनया देहलीमुक्तपुष्पैः मत्संयोगं हृदयनिहितारंभमास्वा-
दयंती प्रायेणैते रमणविरहेष्वंगनानां विनोदाः ९२ कुलकम् सव्यापारामहनि न तथा पीडयेन्मद्वियोगः शंके रात्रौ गुरुतरशु-
चं निर्विनोदां सखीं ते मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे तामुन्निद्रामवनिशयनां सन्नवातायनस्थः ९३ आधिक्षा-
मां विरहशयने सन्निषण्णैकपार्श्वां प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः मत्संयोगः सुखमुपनयेत्स्वप्नजोपीति निद्रां
आकांक्षंतीं नयनसलिलोत्पीडरुद्धावकाशां ९४

थे अर्द्धरात्रे तां साध्वीं मद्भार्यां मत्संदेशैः सुखयितुं अलं समर्थो भव किं विशिष्टां साध्वीं उन्निद्रां निद्रावर्जि-
तां किं विशिष्टः त्वं अवनिशयनासन्नवातायनस्थः अवनिशयनस्य भूमिशयनस्य आसन्नो निकटः यो वातायनः गवाक्षः तत्र तिष्ठतीति अवनिशयनासन्न-
वातायनस्थः ९३ आधिक्षामेति पुनः किं विशिष्टा सा आधिक्षामा आधिर्मानसी चिंता तेन दुर्बला आधिक्षामा पुनः किं विशिष्टा सा विरहशयने सन्निषण्णैकपा-
र्श्वा सन्निषण्णः निवेशितः एकः पार्श्वो यया सा पुनः किं विशिष्टा सा हिमांशोः चंद्रस्य प्राचीमूले पूर्वदिङ्मूले कलामात्रशेषा तनुरिव पुनः किं विशिष्टा सा रात्रिनिद्रां

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

आकांक्षन्ती वांछंतीरतीति किं स्वप्नजोपि मत्संयोगः सुलभः उपनयेत् किं विशिष्टां निद्रां नयनसलिलोत्पीडरुद्धावकाशां नयनसलिलानां नेत्राश्रूणां उत्पीडेन रुद्धः अवकाशो यस्याः सा तां ॥ २४ ॥ निश्वासेनेति पुनः किं विशिष्टा सा निश्वासेन अलकं कुटिलकेशं विक्षिपंती किं विशिष्टेन निश्वासेन अधरकिसलयक्लेशिना अधरकिसलयं क्लिश्नातीति अधरकिसलयक्लेशी तेन किं विशिष्टं अलकं शुद्धस्नानात् परुषं रूक्षं पुनः किं विशिष्टं अलकं नूनं आगंडलंबि आगंडं आकपोलं लंबते इत्येवं शीलं आगंडलंबि पुनः किं कुर्वंती सा या रात्रिः मया सह क्षणमिव नीता तामेव रात्रिं उष्णैर्विरहजनितैरश्रुभिः यापयंती गमयंती किं विशिष्टां तां रात्रिं विरहवह

निश्वासेनाधरकिसलयक्लेशिना विक्षिपंती शुद्धस्नानात्परुषमलकं नूनमागंडलंबि नीता रात्रिः क्षणमिव मया सार्द्धमिच्छारतैर्या तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयंती ॥ २५ ॥ आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा शापस्यांते विगलितशुचा सा मयोद्वेष्टनीया स्पर्शक्लिष्टामयमितनखेनासकृत्सारयंती गंडाभोगात्कठिनविषमामेकवेणीं करेण ॥ २६ ॥

न्तीं विरहगरिष्ठामित्यर्थः ॥ २५ ॥ आद्येति भो पयोद त्वं एकवेणीं असकृत् वारंवारं करेण धारयंती किं विशिष्टां एकवेणीं गंडाभोगात् कपोलविस्तारात् कठिनविषमां कठिना चासौ विषमा च कठिनविषमा तां पुनः विशिष्टां एकवेणीं करेण स्पर्शक्लिष्टां किं विशिष्टेन करेण अयमितनखेन या वेणी मया आद्ये विरहदिवसे बद्धा तां सारयंती शिखा वेणी सा यस्य अंते मया एव उद्वेष्टनीया किं कृत्वा दाम हित्वा पुष्पमालां त्यक्त्वा किं विशिष्टेन मया विगलितशुचा ॥ २६ ॥ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पादान्निंदोरिति पुनः किं विप्रोषिता सा पक्ष्मभिः चक्षुः स्थापयपिधंती किं विप्रोषितैः पक्ष्मभिः सलिलगुरुभिः जलगरिष्ठैः किं विप्रोषितं चक्षुः पूर्वप्रीत्या इन्दोः पादान् अ
भिमुखे गतं सन्मुखं गतं किं विप्रोषितान् इंद्रोः पादान् अमृतशिशिरान् पुनः किं विप्रोषितान् इंदोः पादान् जालमार्गप्रविष्टान् गवाक्षविवरप्रविष्टान् पुनः किं
विप्रोषितं चक्षुः तथैव सन्निवृत्तं सा का इव साभ्रे अन्हि दिवसे स्थलकमलिनीव किं विप्रोषिता कमलिनी न प्रबुद्धा न सुप्ता ९७ सा संन्यस्ताभरणमिति
भो पयोद सा मद्भार्या अवश्यं निश्चितं त्वामपि नवजलमयं अश्रं मोचयिष्यति किं विप्रोषिता सा अलावलरहिता पुनः किं विप्रोषिता सा गात्रं धारयंती किं वि

पादानिंदोरमृतशिशिरान् जालमार्गप्रविष्टान् पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव चक्षुः खेदात्सलिलगुरुभिः पक्ष्म
भिश्छादयंती साभ्रेऽन्हीव स्थलकमलिनी न प्रबुद्धा न सुप्ता ९७ कुलकं सा संन्यस्ताभरणमबला पेलवं धारयंती शय्यो
त्संगे निहितमसकृत् दुःखदुःखेन गात्रं त्वामप्यश्रं नवजलमयं मोचयिष्यत्यवश्यं प्रायः सर्वो भवति करुणावृत्तिरार्द्रा
न्तरात्मा ९८

प्रोषितं गात्रमसकृत् दुःखेन शय्योत्संगे निहितं स्थापितं पुनः किं विप्रोषितं गात्रं पेलवं कोमलं युक्तोऽयमर्थः प्रायो बाहुल्येन सर्वोपि आर्द्रा
न्तरात्मा करुणावृत्तिर्भवति ९८ त्रिभिर्विप्रोषकं कुलकं जानेति भो पयोद तत्र वसत्याः मद्भार्यायाः मयि मनः निभृतस्नेहं निविडरागमिति अहं जाने
भो पयोद इत्थंभूतां देहप्रीतां प्रथमविरहे अहं तर्कयामि विचारयामि भो जलद सुभगंमन्यभावः मां न खलु वाचालं करोति असुभगं आत्मानं सुभगं म
न्यते इति सुभगंमन्यः अस्य भावः सुभगंमन्यः अस्य भावः सुभगंमन्यभावः हे भ्रातः यत् यस्मात्कारणात् [illegible] तव प्रत्यक्षं अचिरात् निखिलं उक्तम् ९९ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रुद्धापाङ्ग इति सोपयोदमृगाक्ष्याः मत्प्रियायाः नयनं नेत्रं मीनक्षोभात् मत्स्यचलनात् चलकुवलयश्रीतुलां चलकुमुदशोभासमानतां एष्यति प्राप्स्यति इ
ति शङ्के क्व सति त्वयि आसन्ने सति त्वयि निकटे सति किंविशिष्टं नयनं उपरिस्पन्दि स्पन्दमानं पुनः किंविशिष्टं नयनं अलकैः कुटिलकेशैः रुद्धापाङ्ग
प्रसरं रुद्धः अपाङ्गस्य नेत्रान्तस्य प्रसरो येन तत् पुनः किंविशिष्टं नयनं अञ्जनस्नेहशून्यं वर्जितं पुनः किंविशिष्टं नयनं मधुनो मद्यस्य प्रत्यादेशात् तिरस्का

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मादित्थंभूतां प्रथमविरहे तामहं तर्कयामि वाचालं मां न खलु सुभगंमन्य
भावः करोति प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ९९ रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं प्रत्यादे
शादपि च मधुनो विस्मृतभ्रूविलासं त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः मीनक्षोभाच्चलकुवलयश्री
तुलामेष्यतीति १०० वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयैः मुक्ताजालं चिरपरिचितं त्याजितो दैवग
त्या संभोगान्ते मम समुचितो हस्तसंवाहनानां यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वं १ ॥ १ ॥

रात् विस्मृतभ्रूविलासं विस्मृतः भ्रूविलासो यस्य तत् १०० वाम इति सोपयोद अस्याः मत्प्रियायाः वामः मनोज्ञः ऊरुः चलत्वं यास्यति चञ्चलत्वं यास्यति
किंविशिष्टः ऊरुः मदीयैः कररुहपदैः मुच्यमानः त्यज्यमानः पुनः किंविशिष्टः ऊरुः चिरपरिचितं मुक्ताजालं दैवगत्या त्याजितः पुनः किंविशिष्टः ऊ
रुः संभोगान्ते मम हस्तसंवाहनानां समुचितः पुनः किंविशिष्टः ऊरुः सरसकदलीस्तम्भवद्गौरः पीतः १ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तस्मिन्निति भो जलद तस्मिन्काले सा यदि लब्धनिद्रासुखा स्यात् भवेत् भो पयोद तत्रासीनः तत्रोपविष्टः स्तनितविमुखो याममात्रं सहस्व सहस्व भो पयोद अस्याः
मत्प्रियायाः कथंचित् महता कष्टेन मयि स्वप्ने अपि निस्वप्नलब्धे सति सद्यस्तत्कालं गाढोपगूढं कंठच्युतभुजलताग्रंथि मा भूत् मा भवेत् कंठाच्चुताया भुजलतात
स्याः ग्रंथिः तस्मिन् तत् २ तामुत्थाप्येति भो पयोद तां मानिनीं मत्प्रियां सजलकणिकाशीतलेन वायुना उत्थाप्य जागरय्य वक्तुं प्रक्रमेथाः क्व सति गवाक्षे
सनाथे सति कैः धीरस्तनितवचनैः धीराणि स्तनितान्येव गर्जितान्येव वचनानि तैः किं विशिष्टां मानिनीं अभिनवैर्नूतनैर्मालतीनां जालकैः कलिकाभिः

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्यात् तत्रासीनः स्तनितविमुखो याममात्रं सहस्व मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे
कथंचित्सद्यः कंठच्युतभुजलताग्रंथिगाढोपगूढम् २ तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जा
लकैर्मालतीनां विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे वक्तुं धीरस्तनितवचनैर्मानिनीं प्रक्रमेथाः ३ भर्तुर्मित्रं प्रियमविधवे वि
द्धि मामंबुवाहं तत्संदेशैर्मनसि निहितैरागतं त्वत्समीपम् यो वृंदानि त्वरयति पथि श्राम्यतां प्रोषितानां मंद्रस्निग्धैर्ध्वनिभिरबला
लावेणिमोक्षोत्सुकानां ४ ॥

सममं प्रत्याश्वस्तां पुनः किं विशिष्टां मानिनीं विद्युद्गर्भः स्तिमितनयनां विद्युद्गर्भवत् स्तिमिते निश्चले नयने यस्याः
सा तां ३ भर्तुरिति हे अविधवे सभर्तृके मामंबुवाहं मेघं विद्धि जानीहि किं विशिष्टं मां भर्तुः प्रियं मित्रं पुनः किं विशिष्टं मां मनसि निहितैः तत्संदेशैः त्वत्स
मीपं आगतं हे अविधवे यः अंबुवाहः प्रोषितानां पथिकानां वृंदानि पथि मार्गे त्वरयति किं विशिष्टानां प्रोषितानां श्राम्यतां खिन्नानां पुनः किं विशिष्टानां प्रोषि
तानां अबलावेणिमोक्षोत्सुकानां अबलावेणिमोक्षे उत्सुकाः अबलावेणिमोक्षोत्सुकास्तेषां कैः त्वरयति मंद्रस्निग्धैर्ध्वनिभिः धीरमधुरैर्ध्वनिभिः गर्जितैः ४

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मै·टी· इत्याख्यातेति भोपयोदसामज्ञार्य्यो त्वामितिवीक्ष्य हृष्ट्वा च पुनः एवं संभाष्य अस्मात्परं श्रोष्यति किं विप्रियं सा अवहिता सावधाना पुनः किं विप्रियं सा
३० सा उत्कंठोच्छ्वसितहृदया उच्छ्वसितं हृदयं यस्याः सा साकेव मैथिली सीतेव त्वां कमिव पवनतनयमिव हनूमन्तमिव यथा मैथिली पवनतनयं आख्याते
सति उन्मुखी भवति अयमर्थः उक्तः भो सौम्य सीमंतिनीनां नारीणां कान्तोदन्तः सुहृदुपहृतः संगमात् किंचिदूनो भवति ५ तामिति भो आयुष्मन्

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा त्वामुत्कंठोच्छ्वसितहृदया वीक्ष्य संभाष्य चैवम् श्रोष्यत्यस्मात्परमवहिता सौ॰
म्य सीमंतिनीनां कान्तोदन्तः सुहृदुपहृतः संगमात्किंचिदूनः ५ तामायुष्मन्मम वचनादात्मनश्चोपकर्त्तुं संभाषेथा त्वं च
सहचरो रामगिर्य्याश्रमस्थः अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ६

भो चिरंजीव त्वं तां मद्भार्य्यां मम वचनात् च पुनः आत्मन उपकर्त्तुं संभाषेथाः आलापयेथाः हे अबले तव सहचरो मत्तो रामगिर्य्याश्रमस्थः अव्यापन्नः त्वां कु
शलं पृच्छति किं विशिष्टः तव सहचरः वियुक्तः युक्तोयमर्थः सुलभविपदां पूर्वीकृष्टानां प्राणिनां पूर्वाभाष्यं प्रथमकथनयोग्यं एतदेव कुशलप्रश्नमि
त्यर्थः ६ ३०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अङ्गेनाङ्गमिति हे अबले दूरवर्त्ती तव भर्त्ता ताभिः संकल्पैः अङ्गेन अङ्गं विशति आविशति किं विशिष्टः दूरवर्त्ती वैरिणा शत्रुणा विधिना दैवेन रुद्धमार्गः किं वि
शिष्टं अङ्गं प्रतनु सूक्ष्मं किं विशिष्टेन अङ्गेन तनुना दुर्बलेन पुनः किं विशिष्टेन अङ्गेन कि गाढतप्तेन किं विशिष्टं अङ्गं तप्तं किं विशिष्टेन अङ्गेन साश्रेण अ
श्रुसहितेन किं विशिष्टं अङ्गं अश्रुद्रवं वाष्पोद्रवं किं विशिष्टेन अङ्गेन उत्कण्ठितेन किं विशिष्टं अङ्गं अविरतोत्कण्ठं किं विशिष्टेन अङ्गेन समधिकतरोच्छ्वासि
ना अधिकोच्छ्वाससहितेन किं विशिष्टं अङ्गं दीर्घोच्छ्वासं ७ शब्दाख्येयमिति हे अबले यदपि किल इतिनिश्चये यत्ते तव भर्त्ता आननस्पर्शलोभा

तनुना अङ्गेनाङ्गं प्रतनु [तनुना] गाढतप्तं (नतप्तं) साश्रेणाश्रुद्रवमविरतोत्कण्ठमुत्कण्ठितेन दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती सं
कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ७ शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्कर्णे लोलः कथयितुमभू
दाननस्पर्शलोभात् सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्टस्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ८ ॥

त् मुखचुम्बनलोभात् लोलः सखीनां पुरस्तात् इशब्दाख्येयपद्यरचनाकर्णे कथयितुमभूत् हे अबले स ते तव भर्त्ता त्वां उत्कण्ठाविरचितपदं यथा स्यात् एवं त
था मन्मुखेन इदं वक्ष्यमाणं आह उत्कण्ठानि विरचितानि पदानि यस्मिन् कर्मणि तत् उत्कण्ठाविरचितपदं कर्म किं विशिष्टः श्रवणविषयं अतिक्रान्तः पुनः किं वि
शिष्टः सः लोचनाभ्यां अदृष्टः ८ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ष्पामेति हे चंडि हंत रत्नि खेदेक्क चिरपितेत्तव एकस्थं साहसपूर्यं नास्ति किं तत्साहसपूर्यं हे चंडि तव श्रृंगाग्रुरीरपपामास्रु उत्पश्यामितेतत्व दृष्टिपातान् चकितहरिणीप्रे
क्षिते उत्पश्यामि तत्तव गंडछायां पुष्पिनि चंडे उत्पश्यामि हे चंडि तत्तव केशान् पिच्छिनां मयूराणां वर्हभारेषु उत्पश्यामि हे चंडि तत्तव भ्रूविलासान् कटाक्ष
विलासान् प्रतनुषु नदीवीचिषु उत्पश्यामि ९ धारासिक्तेति हे वाले मां प्रतनुमपि दुर्वैलमपि पंचवाणः क्षिणोति किं विशिष्टं मां त्वस्यास्त्वन्मुखस्य दूरीभूतं
किं विशिष्टस्य त्वन्मुखस्य धारासिक्तस्थलसुरभिणः धारासिक्तं यत्स्थलं तद्वत्सुरभि धारासिक्तस्थलं सुरभि तत्स्य हे वाले विगणय विचारय अस्मिन् प

ष्पामास्यं गं चकितहरिणीप्रोक्षते दृष्टिपातान् गंडछायां पुष्पिनि पिच्छिनां वर्हभारेषु केशान् । उत्पश्यामि प्रतनुषु नदीवीची
षु भ्रूविलासान् हंतैकस्थं क्वचिदपि न ते चंडि साहसपूर्यमस्ति ९ धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य वाले दूरीभूतं प्रत
नुमपि मां पंचवाणः क्षिणोति घर्मान्तेस्मिन्विगणय कथं वासराणि व्रजेयुर्दिक्संसक्तप्रविरलघनव्यस्तसूर्यातपानि १०
भित्वास घः किसलयपुटान् देवदारुद्रुमाणां ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः आलिंग्यंते गुणवति मयाते तुषारा
द्रिवाताः पूर्वं स्पृष्टं यदि किल भवेदंगमेभिस्तवेति ११ ॥ र्मान्ते वर्षाकाले वासराणि दिनानि कथं व्रजेयुः किं विशिष्टानि दिनानि दिक
संसक्तविरलघनव्यस्तसूर्यातपानि दिक्संसक्ताः दिक्प्रांतसंलग्नाः प्रविरलाः ये घनाः मेघाः तैर्विच्छिन्नाः सूर्यातपा येषु तानि १० भित्वास
घ इति हे गुणवति तुषाराद्रिवाताः हिमाचलवाताः मया इति आलिंग्यंते इतीति किं रामिवांतेः परिकिलतव अंगे पूर्वं स्पृष्टं भवेत् ये वाताः सप
लत्कालं देवदारुद्रुमाणां किसलयपुटान् भित्वा दक्षिणेन प्रवृत्ताः किं विशिष्टाः तुषाराद्रिवाताः तत्क्षीरक्षुतिसुरभयः तेषां देवदारुद्रुमाणां

सीरक्क्षुत्याडुगयप्रवणेनसुरभयः घनगांधपः तत्सी
रक्क्षतिसुरभयः २८ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त्वामालिख्येति हे अबले त्वां प्रणयकुपितां धातुरागैः शिलायां आलिख्य यावत् आत्मानं तेन च चरणपतितं कर्त्तुं इच्छामि तावत् मे मम दृष्टिः मुहुर्वारंवारं उ
पचितैः अस्रैः आलुप्यते तस्मिन्नपि चित्रेपि क्रूरः कृतान्तः दैवः नौ आवयोः संगमं संयोगं न सहते १२ मामेति हे अबले स्थलीदेवतानां मुक्तास्थू
लाः अश्रुलेशाः तरुकिसलयेषु खलु निश्चितं बहुशः अनेकवारान् पतन्ति किं विशिष्टानां स्थलीदेवतानां मां पश्यन्तीनां किं विशिष्टं मां तेन च निर्द
याश्लेषहेतोः निर्दयालिंगनहेतोः आकाशप्रणिहितभुजं आकाशक्षिप्तभुजं किं विशिष्टायास्ते कथमपि महताकष्टेन स्वप्नदर्शनेषु लब्धायाः प्रा

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् अस्रैस्तावन्मुहुरुपचितैर्दृष्टि
रालुप्यते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः १२ मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोर्लब्धायास्ते कथ
मपि मया स्वप्नसंदर्शनेषु पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति १३
संक्षिप्यन्ते क्षणमिव कथं दीर्घयामा त्रियामाः सर्वावस्थास्वहरपि कथं मंदमंदातपं तं स्यात् इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं त
मे गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः १४ ॥ प्तायाः १३ संक्षिप्यन्तेइति हे चटुलनयने इत्थं अमुना प्रकारेण मम चेतश्चित्तं त्व
द्वियोगव्यथाभिः त्वद्वियोगपीडाभिः अशरणं कृतं किं विशिष्टं चेतः दुर्लभप्रार्थनं दुर्लभं दुःप्राप्यं प्रार्थनं किं विशिष्टाभिस्त्वद्वियोगव्यथाभिः गाढोष्माभिः
निविडतापाभिः इत्थं मिति कथं दीर्घयामा त्रियामाः रात्रयः क्षणमिव कथं संक्षिप्यन्ते अपि तु न कथमपि हे चटुलनयने अहरपि दिवसोपि सर्वावस्थासु प्र
मातसंध्यामध्याह्नेषु मंदमंदातपं कथं स्यात् अपि तु न कथमपि १४ ॥ ७ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नत्वात्मानमिति नन्विति निश्चये हे कल्याणि अहं आत्मानं बहु विगणयन् आत्मनैवावलम्बे आश्रयामि तत् तस्मात्कारणात् हे कल्याणि त्वमपि नितरां अत्यर्थं का
तरत्वं मा गमः मा गच्छ हे कल्याणि अत्यन्तं सुखं कस्य उपनतं आगतं वा अथवा एकान्ततः कस्य दुःखं उपनतं अपि तु न कस्यापि अयमर्थः युक्तः हे कल्याणि दशा
चक्रनेमिक्रमेण रथधाराहस्तान्तेन नीचैर्गच्छति उपरि च गच्छति २५ शापान्तो मे इति हे अबले मम शापान्तः भुजंगशयनात् शेषनागशय्यायाः शार्ङ्गपा-
णौ श्रीकृष्णे उत्थिते सति मे शापान्तो भविता त्वं लोचने नेत्रे मीलयित्वा अन्यान् चतुरो मासान् गमय हे अबले पश्चात् आवां तं तं अभिलाषं चिन्ताभिलाषं

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्। कस्यात्यन्तं सुखमुपनतं दुः-
खमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण २५ शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ मा-
सानन्यान्गमय चतुरो लोचने मीलयित्वा पश्चादावां विरहगुणितं तं तमात्माभिलाषं निर्वेक्ष्यावः परिणतशरच्च-
न्द्रिकासु क्षपासु २६ भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा सान्तर्हा-
सं कथितमसकृत्पृच्छतश्च त्वया मे दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति २७ ॥

क्षपासु रात्रिषु निर्वेक्ष्याव भोक्ष्यावः किं विशिष्टं आत्माभिलाषं विरहगुणितं किं विशिष्टासु क्षपासु परिणतां परिपाकं प्राप्ता शरच्चन्द्रिका यासु ताः तासु
२६ भूय इति हे अबले भूयः पुनरपि अहं त्वमपि मे मम पुरः अग्रे शयने शय्यायां कण्ठलग्ना सती निद्रां गत्वा किमपि रुदती सस्वरं शीघ्रं विप्रबुद्धा हे अ
बले त्वमिदं मम सान्तर्हासं यथा स्यात्तथा असकृत् वारंवारं पृच्छतः इति इतीति किं हे कितव धूर्त त्वमपास्य स्वप्ने कामपि रमयन् दृष्टः २७ ॥ ३२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

एतस्मादिति हे असितनयने एतस्मात् अभिज्ञानदानात् संकेतदानात् मां कुशलिनं विदित्वा ज्ञात्वा कौलीनात् लोकप्रवादात् मयि अविश्वासिनी मा भूः मा भवेः
स्नेहान् किमपि लोकं विरहे ध्वंसिनः आहुः पंडिताः कथयंति हि निश्चितं ते स्नेहाः उपचितरसाः इष्टे वस्तुनि अभोगात् प्रेमराशी भवंति १८ कच्चिदिति
भो सौम्य कच्चिदिति कोमलामंत्रणे त्वया मे मम इदं बंधुकृत्यं कार्यं व्यवसितं व्यवसायापन्नं भो सौम्य भवतः प्रत्यादेशात् तिरस्कारात् धीरतां न खलु
तर्कयामि खलु विचारयामि भो सौम्य त्वं चातकेभ्यः याचितः सन् निःशब्दोपि अनुक्तोपि जलं प्रदिशसि प्रतिददासि युक्तोयमर्थः हि निश्चितं प्र

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा माकौलीनादसितनयने मय्यविश्वासिनी भूः स्नेहानाहुः किमपि विरहे ध्वंसि
नस्ते त्वभोगादिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवंति १८ कच्चित्सौम्य व्यवसितमिदं बंधुकृत्यं त्वया मे प्रत्यादेशान्न खलु भ
वतो धीरतां तर्कयामि निःशब्दोपि प्रदिशसि जलं याचितश्चातकेभ्यः प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव १९ आश्वा
स्यैवं प्रथमविरहादुग्रशोकां सखीं ते शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः साभिज्ञानाभिहितकुशलैस्तद्वचोभिर्ममापि
प्रातः कुंदप्रसवशिथिलं जीवितं धारयेथाः २० ॥

णयिषु सतां उत्तमानां ईप्सितार्थक्रिया एव प्रत्युक्तं प्रतिवचनं १९ आश्वास्यैवमिति भो जलद त्वं
सखीं मम भार्यां आश्वास्य मम अपि जीवितं धारयेथाः कैः तद्वचोभिः मद्भार्यावचनैः किं विशिष्टैः तद्वचोभिः साभिज्ञानाभिहितकुशलैः साभिज्ञानेन संके
तेन अभिहितं कथितं कुशलं येषां तानि तैः किं विशिष्टां सखीं प्रथमविरहात् प्रथमवियोगात् उग्रशोकां गरिष्ठशोकां किं विशिष्टस्त्वं आशु शीघ्रं त्रिनयनवृषोत्
खात् कूटात् कैलाशात् निवृत्तः त्रिनयनवृषेण महेशवृषेण उत्खातानि कूटानि यस्य स त्रिनयनवृषोत्खातकूटः तस्मात् किं विशिष्टं जीवितं प्रातः कुंदप्रसवशि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मे·टी· थिलं प्रातः प्रभाते यः कुंदप्रसवः कुन्दकुसुमं तद्वत् प्रशिथिलं प्रातः कुन्दप्रसवशिथिलं २० एतदिति भो जलद त्वं एतत् मे मम प्रियं कृत्वा इष्टान्देशान् विचर किंवि
३३ शिष्टस्य मे अनुचितप्रार्थनावर्त्तिनः अनुचिता या प्रार्थना तत्र वर्त्तते इत्येवं शीलः अनुचितप्रार्थनावर्त्तीतस्य कस्मात् सौहार्द्दात् मैत्रीभावात् वा अथवा वि
धुर इति दुःखित इति वा अथवा मयि अनुक्रोशबुध्या मयि दया बुध्या किं विशिष्टस्त्वं प्रावृषा संभृतश्रीः उत्पन्नश्रीः च पुनः भो देव तेन तव विद्युता सह वि

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे सौहार्द्दाद्वा विधुर इति वा मय्यनुक्रोशबुध्या इष्टान्देशान् जलद विचर प्रावृषा सं
भृतश्रीर्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः २१ तस्माद्द्रेर्निगदितपथा शीघ्रमेत्यालकायां यक्षागारं विगलित
विभवं दृष्टचिन्हैर्विदित्वा तत्संदिष्टं प्रणयमधुरं गुह्यकेन प्रपन्नात् तद्गेहिन्याः सकलमवलद्दत्कामरूपी पयोदः २२

प्रयोगः क्षणमपि मा भूदेव २१ तस्मादिति कामरूपी स्वेच्छाचारी पयोदः गुह्यकेन यक्षेण तत्संदिष्टं तत् कथितं प्रपन्नात् तद्गेहिन्याः तस्या यक्षोयाः सका
लं अवदत् कथं यथा भवति तथा प्रणयमधुरं स्नेहमधुरं यथा भवति तथा किं कृत्वा तस्मात् अद्रेः रामगिरेः निगदितपथा उक्तमार्गेण अलकायां शीघ्रं
रात्य आगत्य पुनः किं कृत्वा यक्षागारं यक्षगृहं विगलितविभवं गतस्वामिनः दृष्टचिन्हैः कथितं विदित्वा ज्ञात्वा २२ ५ ५ ५ ॥ ३३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तं संदेशमिति ॥ सपदि शीघ्रं जलदो मेघः तं संदेशं दिव्यवाचा दिव्यवाण्या आचचक्षे उवाच किं कर्तुं तस्याः पक्ष्मवध्वाः प्राणान् रक्षितुं किं विशिष्टो जलदः
जनहितरतो लोकोपकाररतः सापि पक्ष्मवधूः सापि पक्ष्मवधूः स्वभर्तुः उदंतं वार्त्तां प्राप्य लब्ध्वा प्रमुदितमनाः सती हर्षितचेताः सती तस्थौ अतिष्ठत् क
विरथीतरमाहहि स्फुटं उन्नमेषु प्रार्थना याञ्चा केषां अभिमतफला न स्यात् अपि तु भवेदित्यर्थः ॥ २३ ॥ श्रुत्वेति धनेशोपि राजराजोपि पूर्वन्निरंतरं रुषा

तं संदेशं सपदि जलदः दिव्यवाचा चचक्षे ॥ प्राणांस्तस्याः जनहितरतो रक्षितुं पक्ष्मवध्वाः ॥ प्राप्योदंतं प्रमुदितमनाः सापित
स्थौ स्वभर्तुः ॥ केषां न स्यादभिमतफला प्रार्थना ह्युन्नतेषु ॥ २३ ॥ श्रुत्वा वार्त्तां जलदकथितां तां धनेशोपि सद्यः ॥ शापस्यांतं स
दयहृदयः संविधायास्तकोपः ॥ संयोज्यैतौ विगलितशुचौ दंपती हृष्टचित्तौ ॥ भोगानिष्टानविरतसुखं भोजयामास शश्व
त् ॥ १२४ ॥ इति श्रीमहाकविकालिदासविरचिते मेघदूताभिधाने महाकाव्ये समाप्तमः ॥

त् भोजयामास किं कृत्वा तां जलदकथितां वार्त्तां श्रुत्वा पुनः किं कृत्वा सद्यस्तत्कालं सदयहृदयं यथा स्यादेवं तथा शापस्यांतं विधाय कृत्वा किं विशिष्टो ध
नेशः अस्तकोपः गतकोपः पुनः किं कृत्वा एतौ दंपती संयोज्य किं विशिष्टौ एतौ विगलितशुचौ गतशोकौ पुनः किं विशिष्टौ एतौ हृष्टचित्तौ हर्षितचि
त्तौ कथं यथा भवति तथा अविरतसुखं यथा भवति तथा ॥ १२४ ॥ इति श्रीमहाकविकालिदासविरचितं मेघदूताभिधानं महाकाव्यं समाप्तम् ॥

॥ मे॰ टी॰ ॥
॥ ३४ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

1059

इति नैषध[illegible]

CC-0 Uma Raman Jha Collection. Digitized by eGangotri